**आरण्यकम्** (XXIII/1) **मार्च 2015** ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

## अर्धवार्षिकं संस्कृतशोधपत्रम्

### संस्कृतप्रसारपरिषद्

आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहार) सरस्वती नः सुभगा मयस्करत्

**त्रयोविंशं वर्षम्, प्रथमोऽङ्कः**
**मार्च 2015**

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 09431451895

   **( ii ) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301

   **( iii ) धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः ई-मेलसङ्केतः पदनिर्देशश्च उल्लिखिताः स्युः।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, अध्यक्षः, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com

## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - त्रयोविंशं वर्षम्, प्रथमोऽङ्कः

**चैत्रः, वि.सं.२०७२**

**मार्च, २०१५**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - ५० रूप्यकाणि* *वार्षिकं शुल्कं १०० रूप्यकाणि*
*संयुक्ताङ्कः - १०० रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागाध्यक्षः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

दैहिको विकारो देहं पीडयति, मनोविकारो मनः क्लेदयति। दैहिको विकारः पथ्यौषधिसेवनादिना निराक्रियते। मानसिको विकारो देहिकविकारवत् तथा सारल्येन निराकर्तुं न शक्यते किं च दैहिकस्यापेक्षया मानसिको विकारो वैपुल्येन वैशद्येन च समधिको भवतीत्यतः मनोविकारो देहविकारं सर्वथाऽतिशेते। देहस्य स्थान-कालेत्युभयगते बन्धेऽनिवार्ये मनसस्तादृशे बन्धेऽनपेक्षितेऽपि सति 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इति प्रसिद्धे वचसि 'एवे'ति प्रयोगेण सांसारिकबन्धस्य निबिडता तत्र च मनस एव हेतुता स्पष्टैव। एतेन सहैव प्रश्नः समुदेति–केनोपायेन मनसो विकारोऽपाक्रियतेऽथवा सर्वथा अयोग्यमेतस्य विकारस्यापाकरणमिति। भारतीयमनीषया आ बहोः कालात् मनसो वृत्तिः विकृतिः तद्विकृत्यपाकृतिनीतिश्च विमृष्टाऽस्ति। न केवलं विमृष्टिरपि तु परीक्षणपूर्वकं मनोविकारविनष्टिः प्रदर्शिताऽपि। 'योगश्चित्तवृत्तिनिरोधः' इति योगशास्त्रस्य मङ्गलावाक्यकथने यथा आचार्यः पतञ्जलिः योगस्य गुणान् संकेतयति तथा चित्तवृत्तेः चाञ्चल्यं दुर्निग्रहत्वं दुःशकनिरोधत्वमपि सूचयत्येव। तथापि चित्तवृत्तेः निरोधोऽशक्योऽपि नास्तीति संसूच्य यमनियमादीन् अष्टाङ्गानुपायान् अग्रे विवृणोति। गीतायामपि श्रीभगवानाह–

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥** (गीता 6/35)

तर्हीदमत्र स्पष्टं यत् संस्कारेण मनसोऽयं विकारोऽपाकर्तुं शक्यते। स संस्कारो भूयो भूय आचर्यमाणैः यमादिभिरथवा संक्षेपतः पौनःपुन्येन आचर्यमाणाभ्याम् अभ्यासवैरागाभ्यां जन्यते। किं चैतेन मनोनिग्रहेण सह अभ्यासवैराग्ययोः लक्ष्यलक्षणभावः सिध्यति।

गीतोक्तिगते इमेऽभ्यासवैराग्ये व्याचक्षाणः श्रीमच्छङ्कराचार्यो ब्रूते– 'अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य' इति। शङ्करोक्तिमिमां विवृण्वता श्रीमदानन्दगिरिणोक्तम्– 'कस्यांचिच्चित्तभूमावित्यविशेषितो ध्येयो विषयो निर्दिश्यते। समानप्रत्ययावृत्तिर्विजातीयप्रत्ययानन्तरितेति शेषः।' मधुसूदनीव्याख्यायां वैशद्येनाभ्यासस्योपपत्तिस्वरूपपरिणत्यादयो विवृतास्सन्ति। तत्र 'प्राणस्पन्दनिरोधार्थम् अभ्यास' इत्युक्तम्। भगवतः पतञ्जलेः 'अभ्यासवैराग्याभ्यां तन्निरोधः' इति सूत्रमुद्धरता श्रीमधुसूदनेन अभ्यासस्य लक्षणं निरूप्योक्तम्– 'मन्त्रजपदेवताध्यानादीनां क्रियारूपाणामावृत्तिलक्षणोऽभ्यासः संभवति। सर्वव्यापारोपरमस्य तु समाधेः को नामाभ्यास इति शङ्कां निवारयितुमभ्यासं सूत्रयति स्म 'तत्र स्थितौ यत्नोऽभ्यासः' इति। तत्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिकस्य प्रशान्तवाहितारूपा निश्चलतास्थितिस्तदर्थं यत्नो मनस उत्साहः स्वभावचाञ्चल्याद् बहिः प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविधः। स आवर्त्यमानोऽभ्यास उच्यते।'

एवमेव गीतोक्तं वैराग्यं विवृण्वता श्रीमच्छङ्कराचार्येणोक्तम्– 'वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद् वैतृष्ण्यम्' इति। एतद् व्याचक्षाणेनानन्द-गिरिणाभिहितम्– 'विषयेषु तृष्णाविषयेषु दोषदर्शनमभ्यस्यते, तेन वैतृष्ण्यं जायते' इति, तदेव वैतृष्ण्यं वैराग्यमिति भावः। मनोनिग्रहार्थम् अभ्यासवैराग्ययोरुभयोरपि आवश्यकतां निरूप्य लौकिकोदाहरणमुखेन श्रीनीलकण्ठेनोदीरितं यत्– 'तत्राभ्यासो नाम कस्यांचित् चित्तभूमौ समानप्रत्ययावृत्तिः। वैराग्यं तु दृष्टादृष्टेष्टभोगेषु ससाधनेषु दोषदर्शनेन वैतृष्ण्यम्। तत्र यथा कैदारिकः केदारेषु कुल्याजलं संचारयन्नेकस्य द्वारं पिधायापरस्योद्घाटयति तद्वद् वैराग्येण विषयस्रोतः खिलीक्रियते अभ्यासेन कल्याणस्रोत उद्घाट्यते इति द्वयोरप्यावश्यकत्वम्। तथा च सूत्रम्– 'अभ्यासवैराग्याभ्यां तन्निरोधः' इति। एतदेव तथ्यं योगभाष्यम् उद्धरता श्रीमधुसूदनेनोपस्थापितं यत् 'तदुक्तं योगभाष्ये।' 'चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च। तत्र या कैवल्यप्राग्भारा विवेकनिम्ना सा कल्याणवहा। या त्वविवेकनिम्ना संसारप्राग्भारा सा पापवहा। तत्र वैराग्येण विषयस्रोतः खिलीक्रियते। विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः' इति। पुनरपि तदीप्रवाहसेतु-बन्धनोदाहरणेन सारल्येन विषयमेवंक्रमेणोपदिशत्याचार्यः– 'तथा तीव्रवेगोपेतं नदीप्रवाहं सेतुबन्धनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहान्तरम् उत्पाद्यते, तथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य समाध्यभ्यासेन प्रशान्तवाहिता संपाद्यत इति द्वारभेदात् समुच्चय एव।' अयमत्राशयो यत् यथा नदीप्रवाहः तीव्रवेगोपेतोऽग्रेसरो भवति तथा चित्तवृत्तिः विषयस्रोतसि तीव्रेण वेगेन प्रवर्तते। वैराग्यद्वारा तत्र नद्याः सेतुरिव विषयस्रोतो नियम्यते, तदनन्तरं नियन्त्रिते संयते वा नदीवेगे तस्य स्रोतसः पुनः कल्यामुखेन यथा केदारेषु प्रवृत्त्या शस्यक्षेत्राणि

अभिषेचितानि भवन्ति तथा अभ्यासद्वारा नियता सा चित्तवृत्तिः कल्याणस्रोतसा सर्वस्य प्राणिमात्रस्य हितमाचरितुं प्रभवेत् इति उभयोः अभ्यासवैराग्ययोः अपेक्षा विद्यत एवेति भावः। केवलं वैराग्ये जाते विषयस्रोतसो नियमनं तु स्यात् किन्तु चित्तवृत्तेः कल्याणकारिता न सम्पद्येत। तद्वत् केवलं कल्याणस्रोतसा अभ्यासवृत्त्या सर्वस्य निखिलस्य जगतः हितं निश्चितं भवतु नाम, तत् समकालं विषयस्रोतसापि अनियतं वस्तुजातं प्रभावि स्यादेव। तेनैतस्य अभ्याससिद्धस्य हितस्यापि विनिश्चयोऽपगतः स्यादिति अभ्यासवैराग्ययोरुभयोः आवश्यकता विद्यत एव।

'अनभ्यासे विषं विद्या' इति विद्याया महत्त्वान्वाख्यानप्रसङ्गे श्रूयमाणा पङ्क्तिः अधीताया अप्यनभ्यस्ताया विद्यायाः दुष्परिणाममपि सूचयति। अभ्यस्ता विद्या तथा उपयोगिनी स्याद् वा न वा, किन्तु अनभ्यस्ता विद्या विषवत् स्वयं तत्प्रयोक्तारं किं च तत्सम्बद्धानपरानपि नाशायितुमथवा तत्प्रयोक्तरि प्रमत्ततादिदुर्गुणान् आधातुं प्रभवतीति भावोऽत्र स्फुटीभवति।

तर्हि अभ्यासाभावः कथमुत्पद्यते? कस्तत्र हेतुः। तत्रैव गीतायामर्जुनो भगवन्तं पृच्छति–

**अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।**
**अप्राप्य योगसंसिद्धिं का गति कृष्ण गच्छति॥** (6/37)

'अयतिः अप्रयत्नवानिति श्रीमच्छङ्कराचार्यपादाः। तत्र 'अयति' शब्देऽल्पार्थे नञ्–प्रयोगं मत्वा अयतिर्नाम 'अल्पयत्न' इति व्याख्याति मधुसूदनाचार्यः, अयतिः 'संन्यासमोचकज्ञानासंपन्नः' इति वदति भाष्योत्कर्षदीपिकायां श्रीधनपतिराह। किं च अयतिः 'शिथिलाभ्यासः' इति वदति श्रीधरस्वामी। तत्र च शिथिलाभासत्वं परिणतिः, 'अयतिर्न सम्यग् यतते' इति वाक्येन संकेतितः सम्यग्यत्नवत्त्वाभावो हेतुरिति समीक्षते आचार्यः श्रीधरस्वामी। 'अयति' शब्दस्य उपर्युक्तेषु अप्रयत्नवान्, अल्पयत्नः, संन्यासमोचकज्ञानासम्पन्नः, शिथिलाभ्यासः इति चतुर्विधेषु अर्थेषु मिथः कस्मिंश्चिल्लघुभेदे सत्यपि परिणतिदृष्ट्या सर्वेषां समानतात्पर्यवृत्तिता परिलक्ष्यते। सा च परिणतिरस्ति 'योगसंसिद्धि'रिति (गीता 6/37)। 'योगफलं सम्यग् दर्शनमेव योगसंसिद्धि'रिति आचार्यशङ्करः, ज्ञानमेव योगस्य संसिद्धिः फलं वेति आचार्यः श्रीधरस्वामी। अभ्यासवैराग्यशैथिल्यात् ज्ञानं नावाप्यते इति भावः।

लोकेऽपि कस्मिंश्चिदपि कर्मणि आत्मनिष्ठा तत्राभ्यासं जनयति, पौन पुन्येन नैरन्तर्येण क्रियमाणं कर्म अवश्यमेव फलं जनयति। अपरं तु अभ्यासस्य शैथिल्येन



वैराग्यमपि चित्तवृत्तिनिरोधाभाव जनयति। स च चित्तवृत्तिनिरोधाभावः तत्त्वज्ञानवताम्। अपि योगं न साधयति। एतद् अभ्यासवैराग्येति गुणद्वयं योगसंसिद्धे कृते रथस्य चक्रद्वयमिव प्रवर्तते। यथा ह्युक्तम्–

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।**
**एवं पुरुषकारेण विना दैवं न सिध्यति॥**

अत्र पुरुषकाररूपेण अभ्यासः किं च दैवभूमिकायां वैराग्यं ग्रहीतुं शक्येते।

आरण्यकं वस्तुतः ताभ्यामेव वृत्तिभ्याम् अभ्यासवैराग्याभ्यां प्रवर्तितुकामं विषयस्रोतसः वेगात् आत्मानं वैराग्यमुखेन निरुध्य भारतीयमनीषायां निहितं सर्वहितकरं तथ्यं कल्याणस्रोतोरूपिणा अभ्यासेन प्रसारयितुं वाञ्छत्येव। किन्तु नैतत् सरलं कर्मेति श्रीभगवता स्वयमेव उक्तम् 'असंशयं महावाहो मनो दुर्निग्रहं चलम्' इति। तथापि मनसो निग्रहार्थं सुनिश्चितं मार्गद्वयमाश्रित्य शोधपत्रमिदं प्रवर्ततां तत्र च विदुषां सहभागित्वं संवर्धतामिति कामयामहे।

गोपबन्धु मिश्र
सम्पादकः

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. **त्रयोदशटीकाकाराणां दृष्ट्या मेघदूतस्य पर्वताना-मुल्लेखः** | निवेदितापतिः<br>अध्यापिका<br>शैलबालामहिलामहाविद्यालयः,<br>कटकम्, ओडिशा | १ |
| २. **श्रीमद्भगवद्गीतायां मानवाधिकारः** | डॉ. सुनीलकुमार प्रधानः<br>संस्कृतशिक्षकः<br>ज्ञाननिकेतनम्<br>खगौल रोड,<br>पटना (बिहारः) | ११ |
| ३. **वैदिकवाङ्मये सत्यम्** | सुकुमार चट्टोपाध्यायः<br>आसिस्टैंट प्रोफेसर<br>संस्कृतविभागः,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | १७ |
| ४. **निवित् पुरोरुक् च** | शिल्पा सिंह<br>शोधच्छात्रा, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | २३ |
| ५. **पाणिनीयव्याकरणे आर्थिकजीवनम्** | प्रतिभा आर्या<br>शोधच्छात्रा, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | २९ |

# त्रयोदशटीकाकाराणां दृष्ट्या मेघदूतस्य पर्वतानामुल्लेखः

**निवेदितापतिः**

## उपक्रमः

कविमण्डलमण्डलीकमुख्यस्य वाग्देवताविलासस्य कविकुलगुरोः कालिदासस्य सर्वासु रचनासु रत्नखण्डमिव चिरदीप्तियुक्तं भुवनप्रथितमद्वितीयं सदाऽभिनवं खण्डकाव्यं भवति मेघदूतम्। अस्य नामश्रुतिरेव कं कं न तरलयति सरलयति विरलयति च, सहैव काव्यास्वादस्वादूनि रचनावर्जितभावचुम्बितानि निरन्तरमेवाह्लादयन्ति भावयन्ति च सहृदयान्।

## 1. टीकाकाराणां परिचयः

मेघदूतं प्रथमशताब्द्यां विरचितम्। तदारभ्योऽद्यप्रभृति प्रायशः शतसंख्यकाः टीका विरचिताः। परं यैः द्वादशटीकाकारानुसारैः प्रबन्धोऽयं प्रस्तुतस्तेषां परिचयाः दीयन्तेऽत्र समयकालक्रमानुसारम्।

1.1 प्रसिद्धटीकाकारेषु स्थिरदेवस्योल्लेख आदौ कर्तुं शक्यते। यस्य बालप्रबोधिनी-त्याख्यातटीकायाः कालो नवमशताब्द्या उत्तरार्द्धमिति निर्णीतम्।[1] प्रत्येकं श्लोकस्य टीकाया आदौ श्लोकस्य तात्पर्यार्थप्रतिप्रादनमेव बालप्रबोधिन्याः वैशिष्ट्यम्।

1.2 काश्मीरदेशीयष्टीकाकारो वल्लभदेवः मेघदूतस्योपरि पञ्जिकाटीकां पञ्जिकाटीकां वा प्रणिनाय। यस्य समय आसीत् दशमशताब्द्याः प्रारम्भः। स राजानकस्यानन्ददेवस्य पुत्रस्तथा तस्योपनामासीत् परमार्थसिंहः।[2] प्रश्नोत्तरच्छलेन संक्षिप्तवाक्यव्यवहारेण च शब्दानां स्पष्टीकरणं भवति टीकायाः वैशिष्ट्यम्।

1.3 सुशीलकुमारदेमहोदयानुसारं त्रयोदशशताब्द्याः प्रारम्भे दक्षिणावर्तनाथकृत-प्रदीपटीकायाः रचना प्रायशोऽभवत्।[3] अस्याः प्रमुखं वैशिट्यं भवति पाठान्तरं तस्य यथार्थताप्रतिपादनञ्च।



1.4 ततः परं जैनटीकाकारेण चरित्रवर्द्धनाचार्येण त्रयोदशशताब्द्याः अन्तिमचरणे चरित्रवर्द्धिनीटीका विरचिता या संक्षिप्ता सरला च।[4]

1.5 चतुर्दशशताब्द्याः प्रारम्भे मैथिलीविदुषा च जगद्धरेण एका उत्कृष्टा तथा विभिन्नदृष्ट्या परिपूर्णा रसदीपिनी रसदीपिका वेति नामधेया टीका प्रणीता।

1.6 ततः परं प्रसिद्धष्टीकाकारो मल्लिनाथस्तथा तस्य टीका सञ्जीवनी प्राचीनटीकास्वन्यतमा या चतुर्दशशताब्द्या अन्तिमभागे विरचिता इति नन्दर्गीकर[5] सुशीलकुमारदे[6] विदुषोः मतम्। तस्य टीकामाध्यमेन कविकृतिषु निहितभावानां स्पष्टाभिव्यक्तिर्भवति।

1.7 तथैव चतुर्दशशताब्द्याः शेषचरणे केरलप्रदेशीयटीकाकारेण पूर्णसरस्वती-महोदयेन विद्युल्लता नामधेया एका उत्कृष्टा टीका विरचिता।[7] तत्र व्याख्यायां यत्र कुत्रापि वितर्क आयाति टीकाकारः युक्तिसंगतप्रमाणेन स्वमतमुपस्थापयति।

1.8 पञ्चदशशतके केरलप्रदेशीयः टीकाकारः ऋषिपुत्रपरमेश्वरः मेघदूतस्योपरि प्रश्नोत्तरशैल्या सुमनोरमणीनामधेयां टीकां प्रणिनाय।

1.9 सप्तदशशताब्द्याः मध्यमभागे सुप्रसिद्धबङ्गीयटीकाकारेण भरतमल्लिकेन भरतसेनेन वा सुबोधा टीका रचिता इति हरप्रसादशास्त्रिणाभिहितम्।[8] काव्यं भवति काव्यार्थ इत्यस्योक्तेः सार्थकतात्र प्रतिपाद्यते।

1.10 अपिच गोपिकामोहनभट्टाचार्येणोल्लिखितं यत् सप्तदशशताब्द्यामपरा एका टीका कृता कृष्णपतिवहोरणेन या कृष्णपतिटीकारूपेण सम्प्रति परिचिता। पूर्ववर्तिटीकानां सूक्ष्माध्ययनं मतमुद्धरणञ्च तस्याः लेखन्याः वैशिष्ट्यम्।

1.11 अष्टादशशतके उत्कलप्रदेशीय (गञ्जाममण्डलान्तर्गत) पण्डित-नरहरिमहोदयेन मेघदूतस्य वेदान्तपरकः अर्थः कृतः। तेन ब्रह्मप्रकाशिकेति नामधेया टीका रचिता या जगन्नाथस्य रथयात्राया उपरि पर्यवसिता। मेघदूतमाध्यात्मिककाव्यरूपेण परिगण्यते अनया टीकया।

1.12 ब्रह्मशङ्करमिश्रेण भावबोधिनी टीका विरचिता यत्र केवलं सारमर्म दीयते। टीकाकारस्य समयः परिचयश्च कुत्रापि नोल्लिखितौ।

1.13 तदनन्तरं रङ्गनाथदासेन प्रश्नोत्तरशैल्यां मेघदूतस्य व्याख्या कृता या अद्यापि अप्रकाशितपाण्डुलिपिरूपेण ओडिशाराज्यसंग्रहालये वर्त्तते।

## 2. टीकाकाराणां दृष्ट्या पर्वताः

भारतवर्षे पर्वताः प्रकृतेः रूपान्तराणीव परिगण्यन्ते। एषां पर्वतानां बहुविधमुपकारं स्मरन्तं प्राचीनाः पुराणकाराः काव्यकाराश्च तेषां महत्त्वं देवनिवासत्वं भारतीयसंस्कृतेः वैशिष्ट्यञ्च द्योतयन्ति। तथैव मेघदूते रामगिरिः; आम्रकूटः, नीचैः, देवगिरिः, कैलासश्च।

**2.1 रामगिरिः –** स्थिरदेवस्यानुसारं दण्डकान्तस्य मुनिनिवासोचितस्थानं रामगिरिः। रामगिरिरत्र चित्रकूटपर्वतो न तु ऋष्यमूक इति वल्लभदेवस्य मतम्। दक्षिणावर्त्तनाथेनोक्तं रामगिरेर्नाम रामनाम्नः पर्वतस्य। अनेन रामकथा सूचितात्र। चरित्रवर्द्धनेनोल्लिखितं यत् रामेण दाशरथिनोपलक्षितो गिरिः रामगिरिश्चित्रकूटः पर्वतः। दाशरथेर्गिरिर्माल्यवान्। यथा रामगिरिवासेन सीताविरहिणा रामेणापि सीता लब्धा यथा तथा अहमपि प्रियामाप्स्यामीति तत्रोक्तं जगद्धरेण। प्रसिद्धः व्याख्याकारः मल्लिनाथः विषयेऽस्मिन् केवलमेतदुक्तवान् यत् रामगिरिश्चित्रकूटः पर्वत इति। तथैव पूर्णसरस्वतीमहोदयेन भणितं चित्रकूटपर्वत इति। ''रामगिर्याश्रमेषु'' इत्यत्र रामेण चिरमध्युषितत्वात्तेनैव नाम्ना प्रसिद्धो गिरिश्चित्रकूटः। रामभुक्तमुक्तेषु शून्येषु तापसनिवासस्थानेषु विरहविधुरितस्य निवासौचित्यात् महाश्वेतादिवत् उपर्यपि स्थलीदेवतामेव प्रस्तावात् न तु मुनीनाम्। बहुवचनेन रणरणिकया क्वचिदवस्थातुमशक्तस्य बह्वाश्रमभ्रमणं व्यञ्जयति। रामगिरिरेव रामगिरिरिति ऋषिगिरिरिति ऋषिपुत्रपरमेश्वरेण भणितम्। भरतमल्लिकस्य मतानुसारं रामेण रघुनाथेनोपलक्षितो गिरिः पर्वतः स्वनामप्रसिद्धो रामगिरिः। चित्रकूटस्य नातिविप्रकृष्टो दक्षिणस्यां दिशि प्रत्यन्तपर्वतो रामगिरिरित्येव नाम्ना प्रसिद्धः। माल्यवान् पर्वतः चित्रकूटगिरिश्च। कृष्णपतिवहोरणेनास्मिन् विषये विस्तृतं विवरणं दत्तम्। रामस्य गिरिः, रामेणोपलक्षितम्। स तु माल्यवानिति दिवाकरः। विरहिणा रामेणात्रैव निवासः कृतः, तस्य पुनः प्रियाप्तिर्जाता ममापि तद्भविष्यतीति माल्यवति निवासबीजम्। रामो नीलः। रामश्चासौ गिरिश्चेति रामगिरिर्नील-गिरिरिति नरहरिणा कथितम्। अपि च ब्रह्मशंकरमिश्रेण रामगिरिश्चित्रकूटाचल इति निर्णीतः। रामगिर्याश्रमेषु रामोपलक्षितगिरेराश्रमेषु वासं चक्रे इति रङ्गदासस्याभिमतम्।

**2.2 आम्रकूटः –** स्थिरदेववल्लभदेवचरित्रवर्धनपूर्णसारस्वतीऋषिपुत्रपरमेश्वर-कृष्णपतिब्रह्मशङ्करमिश्र-जगद्धरमहोदयानां मते आम्रकूटो भवति पर्वतस्य नाम।



मल्लिनाथेनाम्रकूटस्य व्याख्यानावसरे अमरकोष उद्धृतः। यथा-आम्राश्चूताः कूटेषु शिखरेषु यस्य सः आम्रकूटो नाम सानुमान् पर्वतः। आम्रश्चूतो रसालोऽसौ इति कूटोऽस्त्री शिखरं शृङ्गमिति चामरः। आम्राणां कूट आम्रकूट इति नरहरिणा अभिप्रेतः। आम्रकूटोऽपि चित्रकूटः। आलेख्यमनृतं यस्मिन् स चित्रकूटाचल आम्रकूटः। आम्रवृक्षैरुपलक्षितं कूटमस्येत्याम्रकूट इति भरतमल्लिकस्याभिमतम्। चित्रकूट इति निवासः चित्रवासकल्प इति सूच्यते रङ्गदासानुसारम्।

**2.3 नीचैः –** नीचैरिति नाम्ना प्रतीयते यत् तत्र सुरतक्रीडारूपगर्हणीय-कार्यसंघठनत्वात् इत्थं गर्हितं नामकरणं पर्वतस्य। प्रदीपटीका मतमिदं समर्थयति यच्च नीचैरिति सुरतगृहवत्तया नीचैराख्यत्वं पर्वतस्य। अपरपर्वतात् क्षुद्रत्वादपि नीचैः पर्वत इति कथ्यते। सुमतिविजयानुसारं नीचैराख्यो गिरिः खर्वाभिधानः पर्वतः। इदमपि शाश्वतटीकायाः मतम्। भरतमल्लिकः पर्वतस्येदं नाम इति उक्त्वा मतद्वयानन्तरमपि गृह्णाति। तच्च-''नीचैराख्यमिति नीचैरिति आख्या नाम यस्य स तथा तं नीचैराख्यम् अप्रसिद्धनामानं यं कञ्चिदित्यन्ये। अश्लीलत्वात् नीचैः शनैरुच्चारणीया आख्या नाम यस्य, स हि भगनामा गिरिः कांटगिरिरिति ख्यात इति केचित्। रङ्गदासः नीच्चैराख्यातं गिरिमित्युक्तवान्। आधुनिकविद्वद्भिः विदिशायाः समीपे स्थित उदयगिरिपर्वतः नीचगिरिः कथ्यते।[९]

**2.4 देवगिरिः –** देवगिरिविषये प्राचीनटीकाकाराणां दृष्ट्या मतवैविध्यं न दृश्यते। सर्वे टीकाकाराः देवपूर्वं गिरिं देवगिरिरिति मन्वते।

**2.5 कैलासः –** स्थिरदेवस्यानुसारं कैलासः स्फटिकगिरिः। वल्लभ-देवदक्षिणावर्तनाथजगद्धरपूर्णसरस्वतीऋषिपुत्रपरमेश्वरभरतमल्लिकैः कैलासः केलिपर्वतः क्रीडाशैलः लीलासाधनभूतक्षेत्राद्रिरित्युच्यते। कैलासो भवति नीलाद्रिरिति ब्रह्म-प्रकाशिकाटीकानुसारम्। मल्लिनाथः कैलासपर्वतस्य व्याख्यानावसरे शम्भुरहस्यमुद्धरति। यथा-कैलासः कनकाद्रिश्च मन्दरो गन्धमार्दनः। क्रीडार्थं निर्मिताः शम्भोर्देवैः क्रीडाद्रयोऽभवन् इति शम्भुरहस्यम्। रङ्गदासेन कैलासपर्वत इत्युक्तः।

## 3. तुलनात्मकमध्ययनम्

परमेते पर्वताः कुत्र वर्तन्त इत्यस्मिन् विषये अनेके मतभेदाः दृश्यन्ते प्राचीनटीकाकारेष्वाधुनिकगवेषकेषु च। ते यथा-

**3.1 रामगिरिः -** यत्र यक्षेण एकवर्षं व्यतीतं सः रामगिरिरित्युच्यते। परमयं पर्वतः कुत्र वर्तते इत्यस्मिन् विषये पञ्च मतानि दृश्यन्ते। तानि यथा- 1. चित्रकूटः 2. माल्यवान् 3. रामगढपर्वतः 4. रामटेक् 5. परमेतद् निश्चितं यत् रामगिरिर्यत्र कुत्रापि भवतु तत्राधोनिर्दिष्टानि वैशिष्ट्यानि स्युः।

जनकतनयास्नानपुण्योदकेषु (मेघदूतम् 1), स्निग्धच्छायातरुषु (1), आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम् (2), स प्रत्यग्रैः कुटजकुसुमैः (4), तुङ्गमालिङ्ग्य शैलं (12), रघुपतिपदैरङ्कितं मेखलासु (12), स्थानादस्मात्सरसनिचुलात् (14), धातुरागैः शिलायाम् (102)।

प्रसिद्धटीकाकारः बल्लभदेवश्चरित्रवर्धनो मल्लिनाथः पूर्णसरस्वती भरतसेनो ब्रह्मशङ्करमिश्रः रङ्गदासश्च रामगिरिं चित्रकूटमिति मन्यन्ते यो मध्यप्रदेशस्य कर्वीमण्डले वर्तते। किञ्च ''जनकतनयास्नानपुण्योदकेषु (पू.मे.1), रघुपतिपदैरङ्कितम् (पू.मे.12)'' इत्यनयोः दृष्ट्या एतद् ग्रहणीयं यत् इत्थं कश्चन पर्वतो वर्तते यत्र वनगमनसमये रामचन्द्रेण वासः कृतस्तथा सीतादेवी तत्रासुनोत् च। रामायणे चित्रकूटादारभ्य पञ्चवटीप्रसङ्गं यावत् कुत्रापि 'रामटेक् रामगढश्चे'त्यनयोः प्रसङ्गो नायाति यत्र रामचन्द्रस्य वनवासस्तथा सीतादेव्याः स्नानमुल्लिखितम्। अपि च रामायणे उक्तं वनवासकाले रामसीतालक्ष्मणाः दण्डकारण्ये विविधेषु पर्वतशिखरेषु कुट्यादिकं निर्माय वसतिं चक्रुः। तत्र स्थितेषु गिरिनिर्झरेषु सीतास्नानजन्यजलप्रवाहेषु तानि तानि स्थानानि पवित्रितानि बभूवुः। रामायणे पर्वतोऽयं पक्षिसंघातैरनुनादितो गजकुलैर्व्याप्तो मुनीनां वासयोग्यो रम्यो मनोज्ञश्चित्रकूट इति नाम्ना ख्यातः यत्र बहव आश्रमा आसन् येषु आश्रमेषु निर्वासितो यक्षो यदृच्छया परिभ्रमति स्म। परं रामचन्द्रस्यावस्थानहेतोः सम्भवतोऽयं रामगिरिरित्युच्यते।

जगद्धरः, भरतमल्लिकः, कृष्णपतिश्चेति टीकाकाराः माल्यवान् रामगिरिरित्युच्यते यः कर्णाटकप्रदेशस्य हाम्पीनगरे वर्तते। भरतमल्लिकेनास्मिन् विषये उक्तं यत् रामगिरिर्माल्यवान्। यथा प्राक् प्राप्तप्रियाविरहो रामः प्राप्तजीवितालम्बनोऽभूत् तथाहमपि तथा स्यामित्यभिप्रायेण तस्याश्रमेषु वासः कृतः।[10]

वी.के. पराजंपेमहोदयानुसारं मध्यप्रदेशस्य रामगढपर्वत एव रामगिरिरुच्यते। तत्र सीताबेंगरानामधेयगुहायां यानि पदचिह्नानि वर्तन्ते तानि सर्वाणि श्रीरामचन्द्रस्य।



मतस्यास्य समर्थनं कृत्वा श्री एम्. वेङ्कटरमैयामहोदयाः प्रमाणान्युपस्थापयन्ति। तानि यथा मेघदूते रघुपतिपदैरङ्कितमिति पदं वर्तते। यस्मात् ज्ञायते रामगिर्यां श्रीरामचन्द्रस्य पदचिह्नमङ्कितं यदेव सीतावेंगरागुहायां दृश्यते। दूरादेव रामगढपर्वतो वप्रक्रीडापरिणत-गजप्रेक्षणीय इव दृश्यते। पुनश्च ''जोगिमारा-सीतावेंगरा'' चेति गुहाद्वये रामसीतासम्बन्धीनि चित्राणि दृश्यन्ते। गुहायामेकः शिलाभिलेखो वर्तते यद्गात्राङ्कितं प्रणयगीतमेव कालिदासं प्रैरयत् यक्षयक्षिणीसम्बन्धिकाव्यमेघदूतस्य रचनार्थम्।[11]

वासुदेवविष्णुमिराशीमहोदयोऽस्य मतस्य पोषकः यत् रामटेक् एव रामगिरिः।[12] तस्य बह्वीषु अग्रेंजीहिन्दीमराठीलेखेषु रामटेक् एव रामगिरिरिति निर्दिष्टः।[13] तस्य मतानुसारं यदि रामगढपर्वत एव रामगिरिः तर्हि रामगढः नर्मदायाः उत्तरपूर्वे न भूत्वा दक्षिणे भविष्यति। किञ्च यदि मेघः स्थानादस्मादेव उत्तरं प्रतिष्ठते तर्हि मार्गे नर्मदानदी नागमिष्यति। अतः नागपुरात् षड्विंशतियोजनदूरे स्थितः रामटेक् एव रामगिरिः यस्य प्रमाणानि-

पवित्रस्थानमिदं यत्रैकं क्षुद्राकारं सरोवरं वर्तते यस्मिन् सीतादेवी अगाहत। स्निग्धच्छायातरवस्तत्र विद्यन्ते। अस्य गिरेः नामान्तरं सिन्दुगिरिः मृत्तिकारक्तवर्णत्वात्। कालिदासेन धातुरागैर्शिलायामि (पू.मे. 102) त्यनेनास्य भूमिप्रस्तरस्योल्लेखः कृतः। अनेकानि राममन्दिराणि अत्र प्राप्यन्ते। [14]एतदतिरिक्तं मिराशीमहोदयेन रामटेक्पर्वते एकयादवशिलालेखस्योल्लेखः कृतः यत्र रामगिरिणा सह अनेकानि तीर्थस्थलानि वर्णितानि।

**आस्ते धर्मेश्वरो नित्यं स रामस्य गिराविह।**
**पीडितं कलिना धर्मं यः कृपालुरपालयत्॥**[15]

हीरालाल्महोदयोऽपि मतस्यास्य समर्थनं कृत्वा उक्तवान् यत् लङ्कागमनसमये रामः रामटेक्पर्वते स्थितवान्। पुनश्च शम्बूकवधार्थमप्यत्रागतवान्।[16] प्रायसो विद्वांसः रामटेक् इति मतस्य समर्थकाः।[17]

दक्षिणावर्त्तनाथपरमेश्वरयोः मतानुसारं रामस्य गिरिः रामगिरिः, रामेणोपलक्षितत्वात्। ताभ्यां टीकाकाराभ्यां रामगिरिः कुत्र वर्तते इत्यस्योल्लेखो नास्ति। अपि च कोरापत्तनमण्डले नाम कोरापुट्मण्डले वैपारीगुडा इति उपखण्डे स्निग्धच्छायासमन्वितासु पर्वतमालासु अध्युषितो रामगिरिपर्वतो यस्य शिखरस्योपरि विराजते गुप्तेश्वरशिवमन्दिरं

यत् रामेण पूजितं लिङ्गमिति जनजातीनां लोकश्रुतिः। तस्याधः कुलुकुलुनिनादिनी प्रवहति 'शवरी'नदी। पुनश्चात्र ग्रामे ग्रामे लघु-लघु-जलकुण्डानि सन्ति यानि सीतादेव्याः स्नानजन्यपुण्यस्थानानि वर्तन्ते इति बण्डास्त्रियः आमनन्ति। तत्र ताः सीतायाः स्नानसमये उपहासं कृत्वा अभिशप्ताः। तदर्थं ताः मुण्डिताः नग्नाश्च। आषाढस्य प्रथमदिवसे तस्मिन्नेव स्थाने नूनं मेघ आविर्भवति। अतः तत्र समीपस्थाः जनाः कृषिकर्मणि संपृक्ताः भवन्ति यदा तेषां स्त्रियः मेघमवलोक्य सुतरामुत्साहिताः भवन्ति। तदर्थं मेघदूते लिखितं-''क्षेत्रमारुह्य मालम्...।'' पुनश्च कुटजवृक्षाणां बाहुल्यं शाल्मलीलतावेष्टितशालवृक्षाणामरण्यञ्च स्निग्धच्छायाया आनुकूल्यं सृजतः। ओडिशायाः गवेषकेण अनन्तत्रिपाठिशर्ममहोदयेन स्थिरीकृतं यत् कोरापुटमण्डले स्थितः रामगिरिः कालिदासेन वर्णितः।[18]

**3.2 आम्रकूटः -** प्राचीनटीकाकाराणां दृष्ट्या आम्रकूट आधुनिकटीकाकारैरमरकण्टक इत्युच्यते। विषयेऽस्मिन् मतान्तराणि यथा-

अमरकण्टक एव आम्रकूटः।[19] नामदृष्ट्या साम्यं वर्तते। अमरकण्टकोऽयं विन्ध्यस्य पूर्वस्मिन् स्थिताया नर्मदानद्यारुद्गमस्थलं भवति।

वी.जी. पराजंपेमहाशयः अमरकण्टकस्य वादेन उक्तवान् यत् सोहागपुरस्य दक्षिणे तथा महादेवपर्वतस्योत्तरे स्थितः पर्वत एव आम्रकूटः।[20]

वासुदेवविष्णुमिराशीमहोदयानुसारम् आम्रकूटो भवति छिन्दबाडामण्डले अमरवाडाग्रामस्योत्तरे स्थितस्य सातपुडापर्वतस्य शिखरम्। अनेन अमरकटकमतस्य खण्डनावसरे आधारद्वयं यथा-

अमरकण्टकः रामगढपर्वतस्य उत्तरे न भूत्वा दक्षिणपश्चिमे वर्त्तते।

आम्रकूटस्य दावाग्नेः शमनानन्तरं मेघः सत्वरं गत्वा विन्ध्यपादे विशीर्णायाः नर्मदायाः अवलोकनं कुर्यात्। परममरकण्टको भवति नर्मदाया उद्गमस्थलम्। अतोऽमरकण्टक आम्रकूटो भवितुं नार्हति।[21] श्रीचन्द्रबलीपाण्डेयोऽपि बासुदेवविष्णुमिराशीमहोदयस्य मतं समर्थयति।[22]

ओडिशाछतिशगढसीम्नोः मध्ये स्थितः उमरकोट् आम्रकूट इति केषाञ्चित् आधुनिकविदुषां मतम्।

**3.3 देवगिरिः -** कविकालिदासेन भणितं यत् स्कन्दस्य निवासभूमिः



देवगिरिपर्वतो यो गम्भीराचर्मण्वतीमध्ये वर्तते। पुनश्चोक्तं यत् उज्जयिनीदशपुरयोर्मध्ये देवगिरिः वर्तते। आधुनिकविदुषां मतानि यथा-

झांसीभूखण्डस्य दक्षिणपश्चिमयोः षष्टिमीलपरिमितेदूरे स्थितः देवगढपर्वतः।[23]

गर्डेमहोदयानुसारं देवडुंगरीपर्वतः देवगिरिः य उज्जयिनीनागह्रदयोः मार्गे उन्हेलनामकस्थलस्य समीपे वर्तते।[24] डॉ. मिराशीमहोदयः मतमिदमधोलिखितबिन्दुभिः समर्थयति-

नामदृष्ट्या साम्यं वर्तते।

देवडुंगरीपर्वतः गम्भीराचर्मण्वत्योर्मध्ये वर्तते।

अत्र मन्दिरद्वयं वर्तते। एकं भैरवस्यापरं देवधर्मराजस्य। देवधर्मराजस्तु कार्त्तिकस्यापरं नाम। यद्यपि मन्दिरमिदं आधुनिकं तथाप्यनुमीयते यत् प्राचीनस्कन्दमन्दिरस्य स्थाने नूतनमन्दिरमिदं निर्मितमिति।[25]

श्रीरामेश्वरगौरीशङ्करओझामहोदयोऽपि मतमिदं स्वीकरोति। परं देवगढः देवगिरिः भवितुं नार्हति यतो हि तत्र कार्त्तिकेश्वरमन्दिरं न वर्तते। पुनश्च पर्वतोऽयं गम्भीराचर्मण्वत्योर्मध्ये न स्थितः। यद्यपि तत्र गुप्तयुगीयमन्दिराणामवशेषो मिलति तथापि ते विष्णुसम्पर्किताः। एकस्यां शिलायामुपरि केवलं शेषशायिविष्णोः समीपे स्कन्दस्य दर्शनमन्यदेवताभिः सह भवति यत्तु गौणं दृश्यते।[26]

**3.4 कैलासः -** कैलं केलीनां समूहोऽत्र इति कैलासः।[27] सम्भवतः क्रीडास्थलत्वात् पर्वतोऽयं कैलास इत्युच्यते। महाकविना कैलासस्य वर्णनं रघुवंशे कुमारसम्भवेऽपि कृतम्। प्रमुखेषु पञ्चपर्वतेषु कैलासस्य गणना भवतीति रामायणात् ज्ञायते।[28]

विमलचरणमहाशयानुसारं कैलासपर्वतः लदाखपर्वतात् 50 माइल् दूरे वर्तते। बद्रिकाश्रमस्य स्थितिरपि पर्वतेऽस्मिन् आसीत्।[29]

**4. उपसंहारः**

इत्थं यदा प्राचीनटीकाकाराः रामगिरिपर्वतं चित्रकूटः माल्यवान् चेति मन्यन्ते तदा नवीनगवेषकैः नागपुरस्य रामटेक्, मध्यप्रदेशस्य रामगढपर्वतः, कोरापुटमण्डलस्य रामगिरिश्चेत्युच्यते। सम्प्रति गवेषकाः रामगिरिविषये बहूनि मतानि प्रददति। तथैवाम्रकूटोऽमरकण्टकः उमरकोट् चेति मन्यते। कैलासनीचैः पर्वतविषये मतवैविध्यं

न दृश्यते। परं टीकाकाराः देवगिरिं देवगढपर्वतः देवडुंगरीपर्वतश्चेत्यामनन्ति। परमाम्रकूटः रामगिरिश्चैव पर्वतौ अतिप्रसिद्धतया मतवैविध्यं प्रकटयतः। तेषां मतमाकलय्य कथयितुं शक्यते यदेते पर्वताः यत्तु कविकालिदासेनोक्ताः न तु एकेन वैज्ञानिकेन भौगोलिकेन वृष्टिविशेषज्ञेन च। कविः कल्पनाविलासी। अपि च तेषु कालिदासः यः स्वकल्पनया वर्णनवृत्त्या चासम्भवं सम्भवमचेतनं सचेतनञ्च कारयति। परं तत्र यथार्थं वर्तते न वा तत्तु विद्वद्भिः परीक्षणीयम्।

इत्थं ज्ञानवैविध्यात् इदमपि आकलयितुं शक्यते यत् सर्वाणि मतानि सम्यक् भवितुं नार्हन्ति। एतेषु किञ्चन सत्यं काश्चनः मिथ्या च भवेयुः। अस्मादेव ज्ञायते यत् केषाञ्चन टीकाकाराणामपि पर्वतानां विषये सम्यक् ज्ञानं न भवेत्। किञ्च टीकाकाराः भौगोलिकविशेषज्ञाः न भवन्ति। अतः वैज्ञानिकदृष्ट्या भौगोलिकदृष्ट्या च एष विषयो नवीनगवेषकाणां कृतेऽवसरं यच्छति पुनर्निरीक्षणाय पुनर्गवेषणाय पुनःसमालोचनाय पुनर्मतोपस्थापनाय च।

❖

## सन्दर्भाः


1. Meghaduta ed. V.G.Paranjpe (intro.) pp.xxxi-xxxiv(in English) Poona
2. Meghaduta ed. E.Hultzsch-preface (in English), Royal Asiatic Society, 1911
3. Our Heritage-Vol.III, Pt. I. 1955
4. ABORI. VOL. 15 (1933-34), p.109-111.
5. Raghuvamsa (ed). G.R. Nandarigikar, 3rd ed. Preface I.
6. Sanskrit Poetics I, S.K. De, Calcutta, 1960, p.228
7. Our Heritage, Vol, III, Pt. I, 1955, p.17
8. RASB- Catalogue of Sanskrit MSS Vol. VI, 1931, p.ixxxii
9. i) ed. K.B. Pathak, p.83 & 115
   ii) India in Kalidas, p.11
   iii) कालिदास की कृतियों में भौगोलिक स्थलों का प्रत्यभिज्ञान, पृ.73-74
10. Meghaduta with Subodha commentary, (Ed) J.B. Chaudhuri, Calcutta 1950, p.3
11. Ramgiri of Kalidas, JIH. Vol. 41, 1963, p.69-92
12. कुमकुम जिन्दल, मेघदूत की प्रमुख टीकाओं का तुलनात्मक अध्ययन,पृ.148
13. Ramgiri of Kalidas, Nagpur University Journal, Vol.IX, Dec.1943, p.1-8
14. A Visit to Ramtek. Indian Antiquary, Vol. xxxii, p.202
15. Ramgiri of Kalidas, JIH. Vol. 42, pt. 1, Apr. 1964





16. A Visit to Ramtek IA vol.xxxii, p.202
17. Meghaduta, ed. Vasant Ramachandra Narurkar, p.81
18. Meghaduta bhavanuvada, Gouriranjan dash, SJSV. Puri, 2009
19. Ed. H.H. Wilson, 1973, p.16-17
20. कालीदासीयं मेघदूतम्, पृ.147
21. JIH. Vol. 42, p.137
22. कालिदास-चन्द्रबली पाण्डेय, पृ.45
23. ed. H.H. Wilson, p. 42
24. सागरिका-अङ्क 4, सं.2, सं.2022, पृ.1-4
25. सागरिका-अङ्क 4, सं.2, सं.2022, पृ.1-4
26. मेघदूतदेवगिरिः, सागरिका-अङ्क 4, सं.2, सं.2022, पृ.1-4
27. कालिदासग्रन्थावली (अभिधानकोष), पृ.143
28. रामायणम्, किष्किन्धाकाण्डम् - 37/2
29. Geograpical aspect of Kalidasa's works (p.42)


## परामृष्टग्रन्थाः


1. उन्नि, एन्.पि., मेघसंदेश अफ् कालिदास, भारतीय विद्या प्रकाशन, बँगलो रोड, जवाहरनगर, दिल्ली 1987
2. त्रिपाठी, मिथिलाप्रसाद एवं शर्मा जगदीश, मेघदूतम् (अष्टव्याख्याविभूषितम्), कालिदाससंस्कृत-अकादमी, उज्जयिनी, 2009
3. पाठक, ए.पि., मेघदूतम्, ब्रह्मप्रकाशिकाटीकासमन्वितम्, ओडिशा साहित्य एकाडेमी, 1965
4. भट्टाचार्य, गोपिकामोहन, मेघदूतटीका अफ् कृष्णापति, कुरुक्षेत्रविश्वविद्यालय, 1974
5. शर्मा, विजेन्द्रकुमार, मेघदूतम्, साहित्यभण्डार, सुभाष बाजार, मेरठ,2002
6. शर्मा, श्रीकेदारनाथ, शास्त्री, श्रीब्रह्मशङ्कर, मेघदूतम् - व्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृत संस्थान, वाराणसी, 2007
7. शास्त्री, जे.एल्. गरुडपुराणम्, मोतिलाल बनारसीदास, दिल्ली, 1990
8. सूरिदेव, श्रीरञ्जन, मेघदूत- एक अनुचिन्तन, मोतीलाल बनारसीदास, बँगलो रोड, जवाहरनगर, दिल्ली-7, 1985


❖

# श्रीमद्भगवद्गीतायां मानवाधिकारः

डॉ. सुनीलकुमार प्रधानः

## उपक्रमः

मनुष्याणां जीवनस्य स्वतन्त्रतायाः सम्मानस्य समानतायाः च अधिकारः मानवाधिकारः कथ्यते। अयं हि मानवाधिकारः शान्तेः विकासस्य च आधारशिला वर्तते। विश्वयुद्धस्य विभीषिकया त्यक्तजीवितानां परिजनानां पीडामनुभूय मानवाधिकारस्य चिन्तनम् इदम्प्राथम्येन सञ्जातम्। अथ च, 'द ट्वेल्व ऑर्टिकल्स ऑफ द ब्लैक फॉरेस्ट'* इति मानवाधिकारस्य आदिमः आलेखः वर्तते। कालक्रमेण अष्टचत्वारिंशद-धिकोनविंशतितमे वर्षे दिसम्बरमासे दशमे दिनाङ्के संयुक्तराष्ट्रसङ्घेन मानवाधिकार-दिवसः आघोषितः। ततश्च प्राचलन् मानवस्वतन्त्रतायाः गरिम्णश्च रक्षायै विविधाः प्रकल्पाः। मानवजीवने तेषाम् अधिकारान् यथार्थतः आनेतुं प्रयत्नशीलाः अप्यभवन् बह्व्यः स्वयंसेविसंस्थाः।

मानवाधिकारस्य अवधारणा शान्तिपूर्णं सहास्तित्वं प्रति मानवस्य आकाङ्क्षायाः सुरम्यसोपानं विद्यते। अतएव भारतवर्षे त्रिनवत्युत्तरैकोनविंशतिशततमे वर्षे 'राष्ट्रिय-मानवाधिकार-आयोगस्य' स्थापना सञ्जाता। यद्यपि एकोनविंशति-शताब्द्यामेव मानवाधिकारः परोक्षरूपेणात्र प्रवर्तितः। सतीप्रथा बालविवाहश्च रूढिवादिसमाजस्य विद्रूपे आस्ताम्। एतन्निराकृत्य मानवाधिकारस्य रक्षणं कृतवान् राजाराममोहनरायः। भारतीयसंविधानं न केवलं मानवाधिकारं सुनिश्चितं करोत्यपि तु एनं सुतरां रक्षत्यपि। फलतः यथासमयं संविधानसंशोधनेन मानवाधिकारस्य सुरक्षा विहिता वर्तते।[1] आपत्काले अपि जीवनस्य अधिकारः, दलितानां स्त्रीणाञ्च आरक्षणं, भोजनस्य अधिकारः तथा च सूचनायाः अधिकारः इत्येतादृशैः मानवाधिकारस्य सम्यगनुवर्तनं विदधाति भारतमिति वक्तुं शक्यते। वस्तुतः मौलिकाधिकाराः स्वतन्त्रता चैव मानवाधिकारस्य महत्त्वपूर्णाः बिन्दवः सन्ति।



## विषयप्रवेशः

भारतवर्षन्तु विविधचिन्तानानां भूमिः ऋषिमहर्षीणां तपोभूमिः व्यासकालिदासादीनां कर्मभूमिश्च वर्तते। नव्यचिन्तनधारा अत्र नितरां पोषणतामाप्नोतीत्यत्र नास्ति सन्देहः। अतः प्राच्यपाश्चात्त्याः आधुनिकचिन्तकाः वेदादिग्रन्थेषु एव स्वकीयं भ्रमनिवारणं कुर्वन्ति। 'सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्, सह नाववतु सह नौ भुनक्तु' इत्यार्षवचोभिः मानवाधिकारः सुरक्षितः सन् आधुनिकग्रन्थेष्वपि बहुशः उल्लिखितः वर्तते। श्रीमद्भगवद्गीतायां मानवाधिकारस्तु बहुषु स्थलेषु प्रदर्शितो विद्यते। यतोहि भगवद्वाणी गीताऽतीव विलक्षणा वर्तते, मानवः यत्सिद्धान्तमादाय गीतानुशीलनं विदधाति तत्सिद्धान्तमेव सः गीतायां द्रष्टुमारभते।

जन्मना सह स्वास्तित्वस्य रक्षणाय स्वतः प्राप्ताधिकाराः जन्मसिद्धाधिकाराः वर्तन्ते। जीवनस्य कृते शिशोः दुग्धपानमपरिहार्यम्, शिक्षाप्राप्तिः भोजनावासव्यवस्था तथा च आत्मसम्मानयुतं जीवनं स्यादितीत्येदर्थम् अपेक्षितं वातावरणमपि अनिवार्यमेव। मूलतस्तु जीवनस्याधिकारः सर्वेषामपरन्तु यः एतदधिकारं नाशयति सः महत्पापं करोति। तुच्छलोभेनैव एतादृशमाचर्यते जनैः।[2] 'एतान्न हन्तुमिच्छामि' एवञ्च एतान् कौरवान् हत्वा 'न च श्रेयोऽनुपश्यामि' इत्यर्जुनवचसा भावोऽयं स्फुटति यत् केनापि प्रकारेण कस्यचिद् जीवनस्य हानिर्न स्यात्। सर्वे स्वस्थं जीवनं यापयन्तु एतदर्थं 'योगयुक्तो भवार्जुन'[3] इत्युक्त्वान्यत्र स्पष्टं ह्युक्तम्-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥**[4]

आशयोऽयं यन्मानवः स्वाधिकारेषु स्थितः सन् योगयुक्तः स्यात् तथा च समुचिताहारविहारादिभिः दुःखनाशकं योगं प्राप्नुयात् ततश्च स्वस्थं जीवनं यापयेत्।

आहारस्तु मानवस्य मूलभूता आवश्यकता वर्तते। सर्वे प्राणिनः अन्नाद् उद्भवन्तीति गीतायां श्रीभगवद्वचनम्-'**अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः**'[5] इति। परञ्च, मानवाः स्वकीयं प्रकृत्यनुगुणं भोजनं गृह्णन्ति। तत्रापि सात्त्विकभोजनमेव आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धकञ्च[6] भवति न तु दुःखशोकामयप्रदं गृह्णन्तु इत्यपि गीतोक्तनिर्देशः मन्तव्यः।[7]

मानवाधिकारेषु शिक्षायाः अधिकारः अन्यतमः विद्यते। शिक्षा सर्वैः प्राप्तव्या

इति प्राचीनभारतीयजीवनसरणिः। गीतायां शिक्षा ज्ञानरूपेण प्रथितास्ति। अतः ज्ञानेन सदृशं संसारेऽस्मिन् किमपि पवित्रं नास्ति। संयतेन्द्रियः मानवः सर्वदा श्रद्धावान् भूत्वा ज्ञानं प्राप्नुयात्। यतोहि–'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।'[8] तात्पर्यं यत् ज्ञानं (शिक्षां) प्राप्य मानवः क्षिप्रं परमशान्तिं लक्ष्यं वा साधयितुं शक्नोति। ज्ञानप्राप्तिसन्दर्भे त्वत्रैकमुद्घोषवचनम्–

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥**[9]

अर्थात् तत्त्वज्ञानिनः तेभ्यः एव ज्ञानं बोधयन्ति ये विनम्राः सेवाभावयुताः तथा च सान्दर्भिकप्रश्नकर्तारः भवन्ति। नो चेत् 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्'[10] इत्यस्य को लाभः? गुरोः शरणाश्रितः शिष्यः एव सम्यक् ज्ञानं प्राप्स्यतीत्यत्र नास्ति काचिद्विचिकित्सा।[11]

मानवस्वभावस्तु सर्वथा भिन्नो भिन्नः एव। सः स्वप्रकृत्यैव आचरति।[12] प्रकृत्यनुसारं कार्याचरणं नाम सर्वमात्मवशम् इति। आत्मवशं कार्यसम्पादनमेव स्वतन्त्रता कथिता चिन्तकैः। जीवनमेतद्धि स्वचिन्तनेन प्रवर्तितं चेत् स्वतन्त्रेति वक्तुं शक्नुमः। क्रमेऽस्मिन् रागद्वेषौ प्रच्छन्नतस्तिष्ठतः एव। अतः तयोः वशं मा गच्छेत् मनुष्यः; तादृशी स्वस्थव्यवस्था कृतास्ति गीतायाम्। यथाहि भगवान्–

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।**
**तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ॥**[13]

आशयोऽयं विद्यते यत् रागद्वेषौ कल्याणमार्गे विघ्नम् उपस्थापयतः; तद्द्वारा मानवः उच्छृङ्खलः भवितुमर्हति। अतः स्वतन्त्रता रक्षणीया एव। तदपि आत्मनः रक्षणं श्रेयस्करमिति। अन्यत्रापि 'सङ्गं त्यक्त्वा धनञ्जय' तथा च 'मुक्तसङ्गः समाचर' इत्युक्त्वा तत्र-तत्र आसक्तिरहितः मानवः एव मूलतः स्वतन्त्रः इति नितरां तत्त्वमिदं निरूपितं भगवता श्रीकृष्णेन।

समानता मौलिकाधिकारेषु विशिष्टमेकं तथ्यं वर्तते। समत्वदृष्टिरेव समानतायाः उत्सः। समत्वं तु श्रीभगवतः साक्षात् स्वरूपमेव विद्यते।[14] भगवतः न्यायकरणे क्वचिदपि विषमता नास्ति। यथा–



**अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।**
**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥**[15]

तात्पर्यं यत् अन्तकाले यः यं चिन्तयति सः तं प्राप्नोति इत्यत्र सन्देहः नास्ति सः साधनपरायणः सदाचारी भवेत् अथवा कश्चन दुराचारी। एतादृशी समानता कल्पनीया मानवाधिकाररक्षणप्रसङ्गे इति। समानतायाः बोधकशब्दास्त्वत्र बहुधा दृश्यन्ते।[16] तच्छब्देषु समानताद्वारा मानवेषु समानतायाः अधिकारः सुतराम् ऊह्यः। दैनन्दिनाभ्यासे स्वभावे च विषमता शक्यते किन्तु सामाजिकस्तरे सर्वे मानवाः समानाः इति गीतायाः प्रबलः स्वरः। 'यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति'[17] इत्यनेन क्वापि ईर्ष्याद्वेषादीनाम् अस्तित्वं नैव भविष्यति समानतायाश्च सर्वतः रक्षा भविष्यति। अतएव एतत्क्रमे भगवन्निर्देशाः 'पण्डिताः समदर्शिनः' एवञ्च 'समबुद्धिर्विशिष्यते' इत्यनेन समानतायाः भावः परिलक्षितो भवति। किमन्यत् स्त्रियः वैश्याः शूद्राश्चापि यथाशक्यं भगवद्भक्तिं प्राप्तुं शक्नुवन्ति, नास्ति सन्देहलेशः न च भेददृष्टिः।[18]

अस्माकं देशः बहूनां धर्माणां मतानाञ्च देशः अस्ति। अस्मिन् वैविध्यपूर्णे देशे मानवाः धार्मिकस्वतन्त्रयुताः सन्ति। धार्मिकस्वतन्त्रता नाम वैयक्तिकी जीवनशैलीति केचन विद्वांसः। इह द्रष्टव्याऽतीव वैज्ञानिकी दृष्टिः गीतायाः–

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥**[19]

भावार्थोऽयं यत् वर्णाश्रमानुसारं निष्कामभावेन अनुष्ठितं कर्तव्यं 'स्वधर्मः' तथा च तन्निषिद्धं कर्म 'परधर्मः' इति। सम्यक्तया आचरितस्य परधर्मस्य अपेक्षया गुणरहितोऽपि स्वधर्मः उत्तमः विद्यते। स्वकीये धर्मे मरणमपि कल्याणकरमेव किन्तु परधर्मस्तु सदा भयप्रदायकः एव। कुत्रचित् 'कुलधर्माः सनातनाः' पुनश्च 'जातिधर्माः' इति कथनेन कुलपरम्परातः प्राप्ताः अनेकाः प्रथाः सन्निहिताः याः जनैः स्वधर्ममिति मत्वा आचर्यन्ते तु क्वापि स्वभावनियतं कर्तव्यं विधाय मानवः पापं नैवाप्नोति।[20] अतः सहजकर्मैव धर्मः सः न कदापि कथमपि वा त्याज्यः।

मानवाधिकारसम्बद्धाः केचन विषयाः साम्प्रतम् अत्यन्तं प्रसङ्गानुकूलाः सञ्जाताः। यथा– शूद्राणाम् एवञ्च महिलानाम् अधिकारपुरःसरं स्वतन्त्रतायाः विमर्शः। कालान्तरे

विषयोऽयं बहुप्रसिद्धः जातोऽस्ति। यद्यपि अनुसूचितजातीनां जनजातीनां महिलानाञ्च कृते आरक्षणं विधाय मानवाधिकारस्य अभिनवसंरक्षणं विहितं भारतसर्वकारेण। गीतायाम् एतद्विषये स्वनिर्णयं श्रावयति श्रीभगवान्–

**मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।**
**स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥**[21]

आशयः यत् स्त्री वैश्यः दलितोद्भवाः शूद्राश्च सर्वे भगवत्परायणाः परमगतिं प्राप्नुवन्ति न तु केवलं ब्राह्मणादयः। अत्र सामाजिकसमरसतायाः अपि अद्भुतं स्वरूपं दृश्यते। चतुर्वर्णविषये तु स्पष्टाऽऽवधारणा गीतायाः 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।[22] तदनु एतेषां चतुर्वर्णानां कर्माणि स्वभावतः उत्पन्नगुणैरेव विभक्तानि सन्ति। एतेषां सर्वेषां स्वतन्त्रतायाः अधिकारस्य च रक्षणे भगवान् सततं यत्नशीलः भाति। केवलम् एतेनैव दलितादीनां समाजे सक्रियभूमिका प्रतिनिधित्वञ्च सुनिश्चितमिति मन्तुं शक्यते। कर्तव्याकर्तव्योर्मध्ये व्यवस्थाञ्चेत्थं प्रतिपादयति–'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।'[23] निहितार्थोऽयं विद्यते यत् 'शास्त्रं प्रमाण' मित्युक्त्वा सांविधानिकोपचारं प्रति निष्ठा प्रदर्शिता विद्यते। यथैतेन सांविधानिकोपचारेण लोकाधिकारं साधयितुं शक्यते तथैव शास्त्रनिर्दिष्टकर्मणा बहुविधं कल्याणम् उपार्जयितुं पारयति लोकः।

## उपसंहारः

श्रीमद्भगवद्गीतायां यद्यपि 'अधिकार' इति शब्दस्य प्रयोगः नास्ति तथापि कानिचन पदानि प्रकारान्तरेण तद्व्यञ्जकानि सन्ति। प्रायशः सर्वत्र मानवस्य मानवाय वा कर्तव्यानुप्राणितः अधिकारः एव ध्वनयति। एतादृशस्य मानवाधिकारस्य रक्षणं पोषणञ्च कश्चन आत्मभावस्थितः अभिमानशून्यः गुणातीतः[24] एव कर्तुं सिद्धः। समाजे निम्नवर्गस्य शोषणं कश्चिद् दैवीसम्पत्सम्पन्नः सात्त्विककर्ता दूरीकर्तुं शक्नोति[25] नोचेत् आसुरसम्पद्युक्तस्तु 'ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी'[26] इति मन्यमानः विविधाः सामाजिकविसङ्गतीः जनयति। सः तामसवृत्तित्वात् मानवस्य आजीविकावसरमपि नाशयति। अतः स्वतन्त्रः सन्नपि शास्त्रविधिमुत्सृज्य कोऽपि नाचरेत्। यतो गीतायां प्रकृतिसिद्धं शास्त्रविधिना नियन्त्रितं संविधानमेव उत्तमस्ति। मानवाधिकारस्य स्वतन्त्रतायाश्च प्रसङ्गेऽस्मिन् गीतोक्तचिन्तनं पाथेयं भविष्यतीति शम्।

❖



## सन्दर्भाः

* 'द ट्वेल्व ऑर्टिकल्स ऑफ द ब्लैक फॉरेस्ट' यूरोपमहादेशे जर्मन्याः कृषकविद्रोहकाले स्वाबियनसङ्घस्य पुरतः उत्थापिताः अभियाचनायाः भागविशेषः।

1. भारतीयसंविधानस्यानुच्छेदाः - 14,15,16,17,19,20,21,23, 24,39,43,45 द्रष्टव्याः
2. श्रीमद्भगवद्गीता, 1/45
3. ,, 8/27
4. ,, 6/17
5. ,, 1/14
6. ,, 17/8
7. ,, 2/22, 'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।'
8. ,, 4/39
9. ,, 4/34
10. ,, 3/2
11. ,, 2/7, 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।'
12. ,, 3/33, 'सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।'
13. ,, 3/34
14. ,, 5/19 'निर्दोषं हि समं ब्रह्म'
15. ,, 9/29 'समोऽहं सर्वभूतेषु'
15. ,, 8/5
16. ,, 2/15, 38; 4/42; 6/8,9,32; 9/29; 12/4,13,18, 13/9,27,28; 14/24
17. ,, 6/30
18. ,, 9/32 'स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।'
19. ,, 3/35, 18/47
20. ,, 18/47
21. ,, 9/32
22. ,, 4/13
23. ,, 16/24
24. ,, 14/24,25
25. ,, 16/33; 12/15-193 18/26
26. ,, 16/14

❖

# वैदिकवाङ्मये सत्यम्

**सुकुमार चट्टोपाध्यायः**

'सत्यं शिवं सुन्दरम्'– इति त्रिकं सत्यसन्धमनुष्यमात्राय रोचते। इह जगति वस्तुनः स्वरूपावबोधनं सत्यशब्दस्याभिधानं भवति। सत्यशब्दस्य निर्वचनप्रसङ्गे निरुक्तकारेण यास्काचार्येणोक्तम्– "सत्यं कस्मात्? सत्सु तायते। सत्प्रभवं भवतीति वा।"[1] तर्हि यास्कानुसारं सत्यशब्दस्यार्थः वस्तुनः वास्तविकस्वरूपस्यावबोधनम्। दुर्गाचार्येण तत् स्पष्टीक्रियते–

"सत्सु एव हि तत् तायते विस्तीर्यते। न हि सतां समीपे शक्यम् अनृतं वक्तुम्। अथवा, सत्प्रभवं भवतीति ये एव हि सन्तः ते एव हि सत्यं वदन्ति।"[2] "सत्यम् = सत् + त्यम्; त्यम् = त्यक् + अम् = ता + य्।"[3] अत्र 'अम्' अवयवस्य लोपः। वैजनाथ काशिनाथ राजवाडे महोदयस्य मते ताय इति तन् धातोः कर्मवाच्ये वैकल्पिकरूपम्। सत्पूर्वकात् तन् धातोः निष्पन्नः 'सत्य'शब्दः। निर्वचनस्य द्वितीयप्रकारानुसारम्– सति प्रभवः यस्य तत् सत्यम्। सत्यशब्दस्य कथनाभिप्रायं त्विदम्– सत्यः वस्तुनः 'वास्तविकमुपस्थितस्वरूपं प्रति नेता भवति अथवा बोधनक्षमः भवितुमर्हति।' 'नामान्याख्यातजानी'ति नैरुक्तमतस्य समर्थने शाकटायनस्य व्युत्पत्तिशैलीप्रसङ्गे यास्काचार्येण सत्यशब्दस्याख्यातार्थः उपस्थाप्यते– "अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः। एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च।"[4] अर्थात् शाकटायनः सत्यमित्येतदेकमभिधानम् 'इण् गतौ' तथा 'अस् भुवि' इति द्वाभ्यां धातुभ्यां साधितवान्। दुर्गाचार्येण तत् स्पष्टीकृतम्– "एतेः इणगतौ इत्यस्य कारितान्तं ण्यन्तं रूपं कृत्वा ततो यकारमन्तमादाय मकारान्तं कृत्वा सत्यशब्दस्यान्त्यमर्धं संचस्कार। ततो यमिति भवति। अस्तेः शुद्धं च। अस् भुवि इत्येतस्य शुद्धमेव रूपं कृत्वा नकारितान्तमित्यर्थः। ततः सकारादिशब्दरूपं गृहीत्वा सदित्येतत्सत्यमित्येतस्य शब्दस्यादिमकरोत्। आद्यमर्धं



संचस्कार। तत्सदिति भवति। अत्र योऽयमस्तेस्तकारः स यकारमधिरोहति।"[5] एवं सत्यशब्दस्य परिनिष्ठितार्थः परिस्फुटति यत् सन्तमर्थमाययति गमयतीति सत्यम्। सायणमते तु वाचिकं यथार्थभाषणं सत्यम्। तन्मते सत्यशब्दस्यार्थः यथार्थः सत्ययुक्तः।

संस्कृताभिधाने 'सत्य'शब्दः पुलिङ्गे तथा च नपुंसकलिङ्गे अनेकार्थकः– ऋतत्वं, याथार्थ्यं, तथ्यं, यथार्थभाषणं, यथाभूतार्थभाषणं, सत्यवचनं, शपथः, सत्ययुगं, समदर्शनं, साधुता, ब्रह्म, पृथिव्यादिभूतपञ्चकम्, शुद्धं, अमोघं, पारमार्थिकम् इत्यादयः। अमरकोषे[6] 'सत्यम्' इति सत्यवचसः पर्यायरूपेण पठ्यते। सत्यवचसः पर्यायचतुष्टयं तत्र– 'सत्यम्', 'तथ्यम्', 'ऋतम्', 'सम्यक्' इति रायमुकुटकृतपदचन्द्रिकाटीकानुसारं–"सति साधु सत्यम्। 'दिगादित्वात् यत्' (पा.4.3.54)। अमूनि सत्यादीनि उपचारात् तद्वति वर्तमानानि त्रिषु। यथा–सत्यो ब्राह्मणः, सत्या नारी, सत्यं जलम्।"

वैदिकवाङ्मये सत्यस्वरूपस्य महत्त्वमपरिसीमितम्। तर्हि यत्र कुत्रापि तस्योल्लेखं मन्त्रद्रष्टारः ऋषयः कुर्वन्ति। कुत्रचित् ब्रह्मस्वरूपावोधकं ब्रह्मपदवाच्यम्, कुत्रचित् सत्यवचनं यथा ऋग्वेदे 'सत्यस्य सुषमस्य शंसः'[7] क्वचित् यथार्थः सत्ययुक्तार्थे यथा 'सत्या भवन्त्वाशिषः'[8] इत्यादयः। पुनः कुत्रचित् पञ्चमहाभूतरूपेण, क्वचित् यथार्थशुद्धरूपेण तस्योपस्थितिः दृश्यते।

यजुर्वेदे सत्यशब्दः ऋतस्य पर्यायरूपेण पठितः– 'ऋतं सत्यम्, ऋतं सत्यम्'।[9] ऋग्वेदे युगपत् स्थितिः 'ऋतं च सत्यं चाभीद्धात्।'[10] शाकटायनस्य सत्यशब्दस्य निर्वचने यद् 'अस्' धातुरस्ति तत् नित्यस्वरूपात्मिका सच्चिदानन्दमूर्तिः। अपरनामधेयम् अस्ति-भातिप्रियरूपात्मकं ब्रह्मपदवाच्यम्, सत्यस्वरूपात्मकस्य ब्रह्मणः प्राप्तिः केवलं श्रद्धया एव भवति 'श्रद्धया सत्यमाप्यते।'[11] प्रजापतिरपि सत्ये श्रद्धां दधाति– 'श्रद्धां सत्ये प्रजापतिः।[12] वैदिक-ऋषिः याज्ञवल्क्यः श्रद्धायाः तथा च सत्यस्य युगपत्प्राप्त्यर्थं स्तुतिं करोति 'सत्यं च मे श्रद्धा च मे।'[13] आत्मनः निवासस्थानं हृदयमेव। सत्यस्य उत्पत्तिस्थानं परमेश्वरस्य हृदयम् 'हृदयेन सत्यम्।'[14] तर्हि ब्रह्मणः तथा च सत्यस्याभेदप्रतिपत्तिर्ज्ञायते 'सत्येन सत्यं यज्ञेन यज्ञः।[15] वैदिकऋषिरपि अनृतात् सत्यमुपैति 'इदमहमनृतात् सत्यमुपैमि।[16] तर्हि सङ्गतिलाभार्थं सत्यस्य पन्थानुसरणमवश्य-मेव करणीयम्–'सत्यमुपगेषं स्विते मा धाः।'[17]

उपनिषदि सम्यग् रूपेण सत्यस्य पराकाष्ठा दृश्यते। तत्र 'सत्यमेव जयति', 'सत्यं वद' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सत्यान्न प्रमदितव्यम्', 'सत्ये सर्वं प्रतिष्ठितम्', इत्यादिमहावाक्यानि निर्दिष्टानि सन्ति। अधुना 'सत्यमेव जयते' इति वाक्यं महद्धार्मिकोपदेशरूपेण प्रचलति। तस्य बीजन्तु मुण्डकोपनिषदि 'सत्यमेव जयति।'[18] तर्हि 'सत्यं किम्' इति प्रश्नः स्वभावतः मनसि आयाति। परमसत्यानुसन्धानी ऋषिः उपनिषदि यत् सत्यस्वरूपम् उपस्थापयति तदत्र विचारणीयम्। सत्यस्य द्विविधार्थकत्वम् उपनिषदि दृश्यते–सत्यभाषणम् एवञ्च नित्यस्वरूपात्मकब्रह्मस्वरूपम्। मुण्डकोपनिषदि परमात्मनः प्राप्त्यर्थं साधनरूपेण सत्यस्योल्लेखः–'सत्येन लभ्यस्तपसा ह्येष आत्मा।'[19] अत्र सत्यशब्देन सत्यभाषणं ज्ञायते। ब्रह्मज्ञानप्राप्त्यर्थं सत्यभाषणमवश्यकर्तव्यम् अर्थात् अनृतत्यागेन तत् प्राप्तव्यम्। सत्यं नाम मनोवाक्कायकर्मभिर्भूतहितयथार्थाभिभाषणम्।[20] सत्यवादी कदापि चिरन्तनसुखरूपस्वर्गलोकात् न विच्युतः भवति। महानारायणोपनिषदि दृश्यते–'सत्यं परं परं सत्यं, सत्येन सुवर्गाल्लोकाच्च्यवन्ते कदाचन।[21] तैत्तिरीयोपनिषदि वेदाध्ययनादनन्तरमाचार्यः आश्रमनिवासी अन्तेवासिनमनुशास्ति। अत्र आचार्यः शिष्यं तदर्थं ग्राहयति। तत्प्रसङ्गे सत्यभाषणार्थम् उपदिशति 'सत्यं वद' 'सत्यान्न प्रमदितव्यम्' 'सत्यमवादिषम्' इत्यादि।[22] एषा भारतीयसंस्कृतेः परम्परागता शिक्षा। ब्रह्मरूपात्मकस्य सत्यस्य महिमा मुण्डकोपनिषदि स्पष्टरूपेण व्यक्तः–

**सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः।**
**येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परमं निधानम्॥**[23]

अत्र सत्यभाषणस्य फलं सत्यस्वरूपस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य परब्रह्मणः परमात्मनः परमधामप्राप्तिः वर्णिता। सत्यस्य प्रशंसा इतिहासोपनिषदि दृश्यते–सत्यं रसः स्वादुतमो रसानाम्,[24] 'सत्यं वदन्त्यनृतमुद्वहन्ति क्षीरं पिबन्ति मधु ते पिबन्ति।'[25] सत्यस्य ऋतानृताभ्यां सहान्तरङ्गः सम्बन्धोऽस्ति। यथा–'ऋतं च सत्यं चाभीद्धात्'[26] 'सत्यं च ऋतं च चक्षुषि विश्वम्'[27] 'सत्यं च मेऽनृतं च मे तन्म उभयं व्रतम्।'[28] तर्हि सत्यानृतयोः सत्यर्तयोः च युगपत्स्थितिः।

महानारायणोपनिषदि अपि ब्रह्मैकत्वरूपेण सत्यभाषणस्य प्रशंसा दृश्यते 'सत्ये सर्वं प्रतिष्ठितं तस्मात् सत्यं परमं वदन्ति।'[29] एवमन्यत्रापि–'सत्ये ह्येव दीक्षा



प्रतिष्ठिता'[30] 'सत्यं वाचः प्रतिष्ठा।'[31] सत्यभाषणस्य प्रकाशः समग्रवैदिकवाङ्मये 'सूत्रे मणिगणा इव' दृश्यते। यथा–ऋग्वेदे 'सत्यं ब्रवीमि'[32] 'सत्यं वदन् सत्यकर्मन्'[33] अथर्ववेदे 'सत्यं वक्ष्यामि नानृतम्'[34] तैत्तिरीयसंहितायां 'सत्यं वदन्त्यन्विच्छ एतत्',[35] 'सत्यमसि',[36] मैत्रायणीसंहितायां 'सत्यं वदन्तीर् महिमानमाप'[37] पुनः तैत्तिरीयोपनिषदि 'सत्यं वदिष्यामि'[38] इत्यादयः।

सत्यशब्दस्यार्थः न केवलं सत्यभाषणमपि तु सत्यस्वरूपात्मकं नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावात्मकं ब्रह्म तथा च ब्रह्मेतरजागतिकसृष्टपदार्थमात्रमेव। ब्रह्मविद्यारूपात्मके उपनिषद्ग्रन्थे यथा–'सत्यं ब्रह्म। सत्यं ह्येव ब्रह्म'[39] 'सत्यं ज्ञानमनन्तं ब्रह्म'[40] 'सत्यं ज्ञानमनन्तं हि यज्ज्ञात्वाऽमृतमश्नुते',[41] सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत्'[42] सत्यं ज्ञानं सच्चिदानन्दरूपं,[43] सत्यं ब्रह्म प्रभुर्हि सः,[44] सत्यमेव परं ब्रह्म[45], 'सत्यमों सत्यमों सत्यमोम्'[46] इत्यादयः। वेदान्तमते मिथ्याराहित्यं अर्थात् बाधाराहित्यं सत्यत्वम्। रुद्रहृदयोपनिषदि तत् स्पष्टीकृतं श्लोकेऽस्मिन्–

**सत्यवद् भवति तत् सर्वं रज्जुसर्पवदास्थितम्।**
**तदेतदक्षरं सत्यं तद्विज्ञाय विमुच्यते॥**[47]

ब्रह्म सत्यविज्ञानमात्रेणावगम्यते।[48] बृहदारण्यकोपनिषन्मते परस्यैव ब्रह्मणः सत्यस्य सत्यं नामोपनिषत्परम्–'सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्'।[49] ऐतरेयारण्यकेऽपि 'सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति।'[50] सर्वसारोपनिषदि 'ब्रह्म सत्यम्' इति वेदान्तदर्शनस्य सारतत्त्वं सम्यग्रूपेणोद्भासयति–सत्यं ज्ञानमनन्तमानन्दं सर्वोपाधिविनिर्मुक्तं कटकमुकुटाद्युपाधिरहित-सुवर्णधनवद् विज्ञानचिन्मात्रस्वभावात्मा यदा भासते तदा त्वं पदार्थः।'[51] सत्यं ज्ञानमनन्तं च वेदान्तदर्शनस्य प्रतिपाद्यं ब्रह्मस्वरूपं तथा च बाधाराहित्यं सत्यत्वम् इति अभेदात्मकं ब्रह्मसत्ययोः स्वरूपं बोध्यम्।

वैदिकवाङ्मये सत्यस्वरूपं ब्रह्मसाम्यात् सत्यलोकरूपेणावगम्यते यथा–'सत्ये सीद',[52] 'सत्यस्य सदने सीदामि'[53] इत्यत्र सत्यशब्देन ब्रह्मलोकः बोद्धव्यः। पुनः पञ्चमहाभूतस्वरूपात्मकं पृथिव्यादि तत्त्वं सत्यस्वरूपेण ज्ञायते। यथा–सत्यमियं पृथिवी,[54] सत्येनावृतममृतं पृथिव्याः,[55] सत्येनोत्तभिता भूमिः;[56] सत्यमापः,[57] 'सत्यं वै तद्रसम्'[58] 'सत्यमयमग्निः'[59], 'सत्यं असावादित्यः'[60], 'सत्येनादित्यो रोचते दिवि'[61], 'सत्यमयं

वायुः'[62] 'सत्येन वायुरावाति'[63] 'सत्यधर्माण परमे व्योमनि'[64] इत्यादिभिः पञ्चमहाभूतानां ब्रह्मस्वरूपकत्वं सत्यशब्देनावगम्यते। एवमेव 'सत्यस्य सत्यमसि,[65] 'सत्यस्याध्यक्षमसि'[66] सत्ये सत्यं जुहोमि स्वाहा[67] 'सत्यस्यापिहितं मुखम्'[68] इत्यादयः पङ्क्तयः सर्वत्र ब्रह्मस्वरूपं सत्येन द्योतयन्ति। 'सत्यमों सत्यमों सत्यमोम्'[69] इति वारत्रयकथनेन ओमित्यनेन ब्रह्मस्वरूपस्य सत्यशब्देन अभिन्नत्वं सूच्यते। परापरब्रह्मस्वरूपः ओङ्कारः प्रतीकरूपः।

निष्कर्षतः, सत्यस्यानुसन्धानं वैदिककालात् निरन्तरं प्रचलति। व्यापकत्वात् अनादितया ब्रह्म प्रतिपदार्थं विद्यते। ब्रह्मणि विद्यमाने सत्येव सर्वथा सर्वदा च सत्यस्य बोधोऽनुभवश्च भवतः। शाश्वतसत्येन सह साहचर्यात् प्रातिभासिकसत्यस्वरूपमक्षरं पुरुषाख्यं तस्मिन् शाश्वते परब्रह्मणि लयमेति। सत्यस्य यथार्थरूपेणानुसन्धानं ब्रह्मानुसन्धानमेव। ब्रह्मवित् स्वयं नित्य-शुद्ध-बुद्ध-मुक्तस्वभावात्मा भूत्वा सत्यस्वरूपं बोद्धुं शक्नोति।

❖

## सन्दर्भाः


1. निरुक्तम् III.13
2. दुर्गाचार्यवृत्ति, नि.III.13, पृ.245, विनायक गणेश आप्टे, आनन्दश्रम, पुना,1921
3. निरुक्तम् - सम्पा.बैजनाथ काशिनाथ राजवाडे, पुना, 1993, पृ.482
4. निरुक्तम् - I.13
5. दुर्गाचार्यवृत्ति, नि. I.13, पृ.75
6. सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति, अमरकोष I.6.172
7. ऋग्वेद VI.35.2
8. ऋग्वेद VI.17.5
9. य.वे. XI.47
10. ऋ.वे. X.190.1
11. य.वे. XIX.3.0
12. य.वे. XIX.77
13. य.वे. XVIII.5





14. ,, XIX.85
15. ,, XX.12
16. ,, I.5
17. ,, V.5
18. मुण्डकोपनिषद् III.1.6
19. ,, III.1.5
20. शाण्डिल्योपनिषद् I.1.3
21. महानारायणोपनिषद् XVI.22
22. तैत्तिरीयोपनिषद् I.11.12
23. मुण्डकोपनिषद् III.1.6
24. इतिहासोप. 44
25. ,, 7
26. ऋ.वे. X.190.1
27. अ.वे. IX.5.21
28. आपस्तम्बमन्त्रब्राह्मण II.5.7
29. महानारायणोप. XVI.1
30. बृह. उप. III.9.23
31. तै. आ. X.63.1
32. ऋ. वे. X.117.6
33. ,, X.113.4
34. अ.वे. IV.9.7
35. तै.सं. IV.3.11.3
36. ,, I.6.1.1
37. मै.सं. II.13.10
38. तै. उप. I.1
39. बृ. उप. V.4.1
40. तै. उप. II.1.1
41. गान्धर्वोप. 1;4
42. वराहोप. III.2
43. शु.र.उप. II.5
44. तेजबिन्दु उप. V.35
45. त्रि.म.ना.उप. III.3
46. अथर्वशिरस् उप. III.16
47. रुद्रहृदयोप.34
48. तेजबिन्दु उप. III.41
49. बृ.उप. II.1.20
50. ऐ.आ. II.3.8.2
51. सर्वसारोप. 6
52. काठकसंहिता 39.6
53. कौशिकसूत्र III.7; 137-39
54. आप.श्रौत सूत्र IX.7.37
55. अ.वे XII.1.8
56. ऋ.वे. X.85.1
57. तै.आ. X.22.1
58. तै.आ. X.15.1
59. आ.श्रौ.सू. IX.7.37
60. ,, IX.7.37
61. महानारायणोप XVII.1
62. आ.श्रौ.सू. IX.7.37
63. महानारायणोप. XVII.1
64. ऋ.वे. V.63.1
65. तै.सं. I.6.1.1
66. तै.स. I.6.1.1
67. मानव श्रौ.सू. VIII.10
68. य.वे.40.17/ई.उप.17
69. अथर्वशिरस् उप. III.16


❖

# निवित् पुरोरुक् च

**शिल्पा सिंहः**

वेदाः अस्माकं संस्कृतेर्मूलस्रोतांसि, अस्माकं सभ्यतां च उच्चस्तरं प्रापकाः ग्रन्थरत्नास्सन्ति। एते लोकस्य सम्पूर्णसंस्कृतेः, भाषायाः, धर्मस्य, दर्शनस्य, सम्प्रदायस्य, उपासनापद्धतेश्च मूलस्रोतांसि सन्ति। चतुर्वेदेषु प्रथमो वेदः ऋग्वेदोऽस्ति। ऋग्वेदस्य सम्पूर्णतयोपलब्धायां शाकलसंहितायां दशमण्डलानन्तरं सम्पादकैः खिलभागः अथवा परिशिष्टभागो मुद्रितोऽस्ति। मुद्रितस्य परिशिष्टस्यास्य पञ्चमे अध्याये क्रमशः पञ्चमं षष्ठस्य सूक्तं 'निवित् पुरोरुक्' इति नाम्ना दृश्यते। तत्परिचयोऽत्र समुपस्थाप्यते।

**निविदध्यायः-**''निविद्'' शब्दस्य निरुक्तिः नि+विद् (ज्ञाने) धातुना क्रियते। अत्र पाणिनिसूत्रेण–**'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनिराजामुपसर्गेऽपि क्विप्'**[1] इति क्विप् प्रत्ययो भवति। निघण्टोरनुसारं शब्दोऽयं वाचः पर्यायोऽस्ति। निविदः सामान्यः अर्थः 'वाक्' इति तथा च विशिष्टार्थो निवित्संज्ञका मन्त्राः इति। अयं भावः यास्काचार्येण अभिहितोऽस्ति–**'यथो एतत् निवित् सौर्यवैश्वानरी भवति'**[2] इति। याज्ञिकप्रयोजनेषु निविन्मन्त्राः प्रयुक्तास्सन्ति। मन्त्रेष्वेतेषु देवतानां नामानि एवञ्च तेषां वैशिष्ट्यानामुल्लेखः प्राप्यते। तथा च यज्ञे आह्वानहेतोः तत्तद्देवतानां स्तुतिः क्रियते। निविदध्यायान्तर्गते प्राप्ताः मन्त्राः सोमयागसवनैस्सह सम्बद्धास्सन्ति।

ऋक्परिशिष्टान्तर्गते प्राप्ते निविदध्याये ''अध्यायः'' इति शब्दप्रयोगोऽयं न केवलम् ऋग्वेदाय। अपितु सम्पूर्णवेदे एव 'अध्यायः' एवञ्च 'स्वाध्यायः' इति शब्दयोः प्रयोगो वर्तते। कथनस्य तात्पर्यमिदं वर्तते यत् निविन्मन्त्राः वेदांशाः। ऋग्वेदेऽपि निविच्छब्दः बहुशः प्राप्यते। यज्ञेन सह विशिष्टतया सम्बद्धमन्त्राणां संकलनं निबिदध्यायान्तर्गतेऽस्ति। वेदांशाः एते, अनेन कारणेन याज्ञिकदृष्ट्या एतान् मन्त्रान् एकत्र संकलय्य अध्यायस्य स्वरूपं प्रदीयते। सम्प्रति जिज्ञासेयमुत्पद्यते यद् एतेषां निविन्मन्त्राणां संकलनं पृथक्तया किमर्थं कृतमस्ति? एते ऋग्वेदस्य दशसु



मण्डलेषु किमर्थं समाविष्टाः न कृतास्सन्ति? अस्योत्तरमिदं वर्तते यत् –यज्ञीयविनियोगस्य क्रमानुसारं अथवा एकत्राभ्यासस्य दृष्ट्या एतेषां पृथक् संकलनं पाठसौकर्याय कृतमस्ति। निविच्छब्दः ऋग्वेदे प्राप्यते। अतः स्पष्टं वर्तते यत् एते ऋग्वेदेन सह सम्बद्धास्सन्ति। ऋग्वेदस्य **'प्रेदं ब्रह्म'**[3] सूक्तमिदं निवित्सु आयाति। परं कालानन्तरं बहुशः यज्ञीयावश्यकतायाः कारणेन तेषां पृथक् संकलनं मूलरूपेण अनिवार्यतः प्रतीयते स्म। अतः निविदध्यायस्य संकलनमभवत्। एतेषां ऋग्वेदेन सह अभ्यास-सम्बन्धः अनन्तकालं यावत् भवेत् एतदर्थं ऋग्वेदस्य 'परिशिष्टभागे' एभ्यः स्थानं प्रदीयते।

**ऋग्वेदे निविच्छब्दः–** सम्पूर्णे ऋग्वेदे निविच्छब्दः बहुशः आयाति। तेन स्पष्टं भवति यत् साक्षात्कृतधर्माणः ऋषयः निविदः सामान्यम् एवञ्च विशेषम् अर्थमभिलक्ष्य मन्त्रदर्शनं कृतवन्तः। ऋग्वेदस्य मन्त्रोऽयम्–

**स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम्।**
**विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम्॥**[4]

मन्त्रेऽस्मिन् प्राचीननिविदः वर्णनमस्ति। ऋषिः कुत्स आह, अग्निः मनोः प्राचीनैः अथ च स्तुतिगर्भमन्त्रैः संतुष्य मानवीं प्रजां ससृजे। ऋग्वेदस्याग्रिमे मन्त्रेऽपि निविच्छब्दो दृश्यते–

**यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ।**
**तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम्॥**[5]

अत्रापि निविच्छब्दस्य केवलं पारिभाषिकः अर्थ एव संगतो वर्तते यद्वयं पुनः पुनः निविदां पाठं करिष्यामः। ऋग्वेदस्य अग्रिममन्त्रद्वये निविच्छब्दः प्राप्यते–

**तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम्।**
**अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत्॥**[6]
**जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु।**
**अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु॥**[7]

एतयोः द्वयोः मन्त्रयोः 'पूर्वया निविदा', 'निविदः पूर्व्या' इति आगतवन्तौ स्तः। एतयोः आशयः 'नित्या वाक्' मात्रं वर्तते। प्रथममन्त्रस्यार्थः वर्तते यत् भगं, मित्रं, अदितिं, दक्षं, अस्त्रिधमरुद्गणं, अर्यमाणं, वरुणं, सोममथ चाश्विनद्वयम् पूर्ववेदात्मकवाक्येन वयमाह्वयामः। अत्र निविदः तात्पर्यं वेदात्मकं वाक्यमस्ति

एतादृशं कथनं ऋग्वेदस्य मन्त्रेऽस्मिन्नपि दृश्यते–

**वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः।**
**आद्वां ब्रवाम सत्यान्युक्था नकि वेभिर्यतथो महित्वा॥**[8]

अत्र वाक् अथ च निविद् इति पदद्वयमस्ति। अत्रोभयोः अर्थोऽपि भिन्नः। वाचः तात्पर्यमस्ति वाणी तथा च 'निविद्' इति पदं निविन्मन्त्राणाम् अर्थं प्रकटयति। एवम् ऋग्वेदस्य अनेकेषु मन्त्रेषु निविच्छब्दः प्राप्यते, येन स्पष्टोऽयं भवति यत् ऋग्वेदीयाः मन्त्राः वाग्रूपेण निवित्पदवाच्या आसन् तथा च विशेषतः समस्तयज्ञयागानां गूढरहस्यैः सह प्रयुक्ता एते निविन्मन्त्राः यज्ञेषु प्रयुज्यन्ते।

**ऐतरेयब्राह्मणे निविद्–** ऐतरेयब्राह्मणे सोमयागान्तर्गते 'आज्यशास्त्रे' निविदः प्राप्तिर्भवति। निविदः विषये तत्रोच्यते–**'ब्रह्म वा आहावः, क्षत्त्रं निविद्विट्सूक्तमाह्वयतेऽथ निविदं दधाति, ब्रह्मण्येव तत्क्षत्त्रमनुनियुनक्ति निविदं शस्त्वा सूक्तं शंसति, क्षत्त्रं वै निविद्विट्सूक्तं क्षत्त्र एव तद्विशमनुनियुनक्ति।'**[9]

एतदनन्तरं प्रजापतेः सृष्टिम् ऋषिः कुत्सः दिव्यदृष्ट्या पश्यन्नुक्तवान् यत् **'तदेतदृषिः पश्यन्नभ्यनूवाच 'स पूर्वया निविदा कव्यताऽऽयोरिमाः प्रजा अजनयन् मनूनाम्'**[10] इति।

अर्थात् सः प्रजापतिः पूर्वं प्रादुर्भूतात् द्वादशपदात्मकात् निविच्छब्दसृष्टिं प्राप्तवान्। अत्र परा वागेव निवित्पदवाच्या प्रतिभाति। तदनन्तरं वैवस्वतादिमनूनाम् इमां ब्राह्मणक्षत्रियादिरूपां प्रजां सृष्टवान्।

खिलपञ्चमः निविदध्यायस्य प्रथमः मन्त्रः–**'अग्निर्देवेद्धः। अग्निर्मन्विद्धः। अग्निः सुषमित्। होता देववृतः।'** मन्त्रस्यास्य व्याख्यायाम् ऐतरेयब्राह्मणे उक्तमस्ति यद् अग्निर्देवैः प्रज्वलितो बभूव– अस्य निविद्भागस्य होता शंसनं करोति। आदित्यमण्डले अवस्थितः प्रकाशः एव देवैः प्रज्वलिताग्निः वर्तते। यतोऽयमग्निः देवैः प्रज्वलितः। तस्याग्नेः स्तुत्या आदित्यरूपप्रकाश एवास्मिन् द्यवि प्रसार्यते। 'अग्निर्मन्विद्ध' इत्यस्य व्याख्या एवं कृतास्ति–

**'अग्निर्मन्विद्ध इति शंसत्ययं वा अग्निर्मन्विद्ध इमं हि मनुष्या इन्धतेऽग्निमेव तदस्मिँल्लोक आयातयति।'**[11]

अर्थात् अयमग्निः मानवैः प्रज्वलितः अतः भूलोकवर्ती अग्निरयं वर्तते। अस्य



भागस्य पाठेन अयमग्निरेव भूलोके प्रसार्यते। एतदनन्तरं तृतीयं पदमस्ति–

**'अग्निः सुषमिदिति शंसति वायुर्वा अग्निः सुषमिद् वायुर्हि स्वयमात्मानं समिन्धे स्वयमिदं सर्वं यदिदं किंच वायुमेव तदन्तरिक्षलोक आयातयति।''**[12]

अर्थात् शोभनः समिध्यमानः अग्निः वर्तते। अस्य पाठं होतृनामक ऋत्विक् करोति। सुन्दरः दीप्तिमान् अग्निः वायुरेवास्ति। यतोहि वायुः स्वयम् एवञ्च जगत्यामस्यां यत्किमपि तत्सर्वं तेन सम्यक्तया प्रकाश्यते। एवं तेन पाठेन वायुमेवान्तरिक्षलोके प्रसार्यते। अग्रिमे चतुर्थे पदे उक्तमस्ति यत् –

**'होता देववृत इति शंसत्यसौ वै होता देववृत एष हि सर्वतो देवैर्वृत एतमेव तदेतस्मिँल्लोक आयातयति।'**[13]

अर्थात् होता देवैः वृतः अस्य पाठं करोति। आदित्योऽयं सायं प्रातःकाले होमस्य कारणम् अतः देवैः वृतोऽस्ति, यतः सर्वतः द्युलोके अवस्थितः अतः देवैः वृतोऽस्ति।

एवम् ऐतरेयब्राह्मणे निविन्मन्त्राणां व्याख्या प्राप्यते। इह स्पष्टोऽयं भवति यत् निविद् यज्ञेषु प्रयुज्यमानाः विशिष्टाः मन्त्रास्सन्ति।

**शतपथब्राह्मणे निविद्–** शतपथब्राह्मणेऽपि निविच्छब्दस्य प्राचुर्यम्। इहापि निविन्मन्त्राः उद्दिष्टास्सन्ति। तृतीये अध्याये सोमयागस्य वर्णनमस्ति यस्मिन्नयं शब्दो लभ्यते–

**तद्यन्मैत्रावरुणचमसेन गृह्णाति। यत्र वै देवेभ्यो यज्ञोऽपाक्रामत्तमेतद्देवाः 'प्रैषैरेव प्रैषमैच्छन्पुरोरुग्भिः प्रारोचयन्निविद्भिर्न्यवेदयंस्तस्मान्मैत्रावरुणचमसेन गृह्णाति।''**[14]

अनेनेदं ज्ञायते यत् प्रीत्युत्पादकाः पुरोरुक्मन्त्राः नैवेच्छार्थाश्च निविन्मन्त्रा इति। शतपथब्राह्मणस्य त्रयोदशतमे अध्याये यत्र पुरुषमेधाश्वमेधसर्वमेधादीनां प्रसिद्धयज्ञानां वर्णनमस्ति। अत्र निविच्छब्दस्य प्रयोगो लभ्यते। दृष्टव्योऽयम् – **'अथातस्तृतीयसवनम्। अतिच्छन्दा एव प्रतिपद्वैश्वदेवस्याभिः त्यं देवं'**[15] तथा च द्वितीयः–**'अथात अग्निमारुतम्। मूर्धानं दिवोअरतिं पृथिव्या इति वैश्वानरीयं शस्त्वैकाहिके निविदं दधात्या।'**[16] अनयोः कण्डिकयोः विस्तृतरूपेण निविच्छब्दस्य वर्णनं प्राप्यते।

**अथर्ववेदे निविद्–** ऋग्वेदे तु निविच्छब्दः प्राप्यते एव। अथर्ववेदसंहितायामपि निविच्छब्दो लभ्यते। मन्त्रेऽस्मिन् होत्रा यज्ञावसरे निविन्मन्त्रः वर्ण्यते–

**चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः।**

**उच्छिष्टे यज्ञा होत्राः पशुबन्धास्तदिष्टयः॥**[17]

एतदनन्तरम् अग्रिमे मन्त्रेऽपि यज्ञदृष्ट्या निविच्छब्दः दृष्टिपथे आयाति–

**प्रेषा यज्ञे निविदः स्वाहा शिष्टाः पत्नीभिर्वहतेह युक्ताः॥**[18]

पाश्चात्यदृष्ट्या निविन्मन्त्राः मन्त्रकालीनास्सन्ति एव। एतेषां प्राप्तिः वेदेषु प्रथमे ऋग्वेदे, ऐतरेयब्राह्मणे, शतपथब्राह्मणे, अथर्ववेदसंहितायाञ्च भवति। खिलरूपे निविदध्याये तेषां संकलनस्य सुरक्षायाश्च कारणं याज्ञिकप्रयोजनानि सन्ति।

**पुरोरुक् –** यथा निविन्मन्त्राः ऋग्वेदसम्बद्धास्सन्ति तेन पुरोरुङ्मन्त्राः यजुर्वेदेन सह सम्बद्धाः। पुरोरुङ्मन्त्राणाम् एकत्र संकलनं परिशिष्टभागे निविदध्यायस्य पश्चात् अस्ति। पुरोरुङ्मन्त्राः सन्ति–

**वायुरग्रेगा यज्ञप्रीः साकं गन् मनसा यज्ञम्।**

**शिवो नियुद्भिः शिवाभिः॥**

**दैव्यावध्वर्यू आ गतं रथेन सूर्यत्वचा।**

**मध्वा यज्ञं समञ्जाथे॥**[19]

ऐतरेयब्राह्मणे पुरोरुक्शब्दस्य निर्वचनमेवमस्ति– **तं पुरोरुग्भिः प्रारोचयन्, यत् पुरोरुग्भिः प्रारोचयंस्तत्पुरोरुचां पुरोरुक्त्वम्॥**[20]

अर्थात् यज्ञे पुरोरुङ्मन्त्रैः – 'वायुरग्नेः इत्यादिभिः ते प्रदीप्तवन्तः, यतो हि पुरोरुङ्मन्त्रैः ते प्रकाशितवन्तः, अतः एते पुरोरुचः इति। कौषीतकिब्राह्मणे पुरोरुक् इत्यस्य प्रतीकात्मकोऽर्थः एवमुक्तः–

**'अथ वै पुरोरुगात्मैव।' 'अथ वै पुरोरुक् प्राण एव।' पुरोरुक् वै वाक्।'**[21] शतपथब्राह्मणे चतुर्थकाण्डान्तर्गते सोमयागवर्णनावसरे एकस्यां कण्डिकायां पुरोरुचः विवेचनं दृष्टिपथम् आयाति– **तं वा अपुरोरुक्कं गृह्णाति। वीर्यं वै पुरोरुङ्नेत्स्त्रीषु वीर्यं दधानीति तस्मादपुरोरुक्कं गृह्णाति॥**[22]

एवं ब्राह्मणग्रन्थेषु पुरोरुचः निर्वचनं समुपलभ्यते। पुरोरुङ्मन्त्राणामपि प्रयोगः यज्ञदृष्ट्या समभूत्। यद्यपि निवित् पुरोरुक् च उभावेव शब्दौ प्राचीनौ अर्थात्



मन्त्रदृष्टौ स्तः। अस्य स्पष्टता अनेन भवति यतोहि एतेषां प्राप्तिः संहिताग्रन्थेषु ब्राह्मणग्रन्थेषु च भवति।

निष्कर्षरूपेण विद्वद्भिः कथ्यते यत् निविदेव पुरोरुक्। 'ऐतरेयब्राह्मणेऽपि निविच्छब्दाः पुरोरुक् कथ्यन्ते।'[23] कीथेन मैक्डॉनलेन च पुरोरुगेव निविद् इत्युक्तमस्ति। खिलसंग्रहेऽपि निविदामनन्तरं पुरोरुचः स्थानं वर्तते। परमेतेषामध्ययनेनेदं ज्ञायते यत् वस्तुतः निविन्मन्त्राः भारतीयगद्यसाहित्यस्य सर्वप्राचीनोदाहरणानि सन्ति। पुरोरुक् निविद्भ्यः स्वरूपदृष्ट्या बहुषु अंशेषु भिन्नास्सन्ति। उभावेव याज्ञिकवचनानां पूर्वतमान्युदाहरणानि सन्ति। यदि प्राचीनत्वं तत्र पश्यामश्चेत् निश्चयेन पुरोरुगपि तादृशाः प्राचीनाः यादृशाः निविद् तथा च उभावेव देवांशौ स्तः।

❖

## सन्दर्भाः


1. अष्टाध्यायी 3/2/61
2. यास्करचितनिरुक्तम् 7/24
3. ऋग्वेदसंहिता 8/37/1
4. ऋग्वेदसंहिता 1/96/2
5. ऋग्वेदसंहिता 1/175/6, 1/176/6
6. ऋग्वेदसंहिता 1/89/3
7. ऋग्वेदसंहिता 2/36/6
8. ऋग्वेदसंहिता 6/67/10
9. ऐतरेयब्राह्मणम् 2/33
10. ऐतरेयब्राह्मणम् 2/33
11. ऐतरेयब्राह्मणम् 2/34
12. ऐतरेयब्राह्मणम् 2/34
13. ऐतरेयब्राह्मणम् 2/34
14. शतपथब्राह्मणम् (माध्यन्दिन-सं.) 3/9/3/28
15. शतपथब्राह्मणम् (माध्यन्दिन-सं.) 13/5/1/11
16. शतपथब्राह्मणम् (माध्यन्दिन-सं.) 13/5/1/12
17. अथर्ववेदसंहिता 11/7/19
18. अथर्ववेदसंहिता 5/26/4
19. सी.जी. काशीकर, ऋग्वेदसंहिता, खिलभागः 5/6/1,4
20. ऐतरेयब्राह्मणम् 3/9
21. शांखायनब्राह्मणम् अथवा कौषीतकि-ब्राह्मणम् 14/4
22. शतपथब्राह्मणम् 4/4/2/11
23. ऐतरेयब्राह्मणम् 2/34


❖

# पाणिनीयव्याकरणे आर्थिकजीवनम्

**प्रतिभा आर्या**

विश्वप्रथितो महिमा खलु भगवतो देवस्य, प्राचीनतमो भगवान् वेदो विराजते वैश्विके वाङ्मये। **सर्वज्ञानमयो हि सः** इत्युक्तिधिया ज्ञानभाण्डागारं हि वेदनिधिः वर्त्तते। तत्र वेदाङ्गेषु मुखस्थानं भजते व्याकरणम्। लौकिकपारलौकिकविद्यां तथा च समस्तवाग्व्यवहारस्य असीमशब्दराशिं विमलमेधासम्पन्नः तत्त्वज्ञः दाक्षीपुत्रः महर्षि-पाणिनिः अष्टाध्याय्यां सुनिबद्धः कृतवान्। शास्त्रेऽस्मिन् भूगोलसामाजिकार्थिकजीवन-शिक्षाधार्मिकराजनीतिकैतिहासिकानां विषये सूक्ष्मातिसूक्ष्मसन्दर्भाः समुपलभ्यन्ते।

साम्प्रतं वयम् अर्थजगति निवसामः, अर्थं विना जीवनस्य न किमपि मूल्यम्, एतदर्थमेव भारतीयसंस्कृतौ जीवननियामकरूपेण पुरुषार्थचतुष्टये अर्थस्य माहात्म्यं प्रदर्शितम्। आर्थिकपक्षे येऽपि पक्षाः समागच्छन्ति ते सर्वे व्याकरणग्रन्थेषु प्राप्यन्ते। तदानींतनानाम् आर्थिकजीवनविषये यथा – कृषिः, क्रयविक्रयः, शिल्पः, भृतिः, वेतनम्, वाणिज्यव्यापारः, ऋणादिविषये कीदृशं ज्ञानमासीत्, कथं वा तेषां व्यवहारः, कथं वा तेषां जीवनम् इत्यादिविषये बहुलानि सूत्रोदाहरणानि च वर्त्तन्ते तान्यत्र द्रष्टुं शक्यन्ते।

**कृषिविषये** यथा कृषेरर्थः केवलं भूमिविलेखनमात्रमेव नैव, नाना कृषेरर्थाः तथा च महाभाष्ये प्रोक्तम्– **नानाक्रियाः कृषेरर्थाः नावश्यं कृषिर्विलेखन एव वर्त्तते। किं तर्हि प्रतिविधानेऽपि वर्त्तते, यदसौ भक्तबीजबलीवर्दैः प्रतिविधानं करोति स कृष्यर्थः।** (भाष्य–3/1/26), कृषिसम्बन्धिनः अनेके शब्दाः – यथा कृषीवलः 'रजःकृष्यासुतिपरिषदो वलच्' (5/2/112) सूत्रेण कृषीवलः अर्थात् 'कृषक' विषये प्रोक्तम्। कर्षणम्, वपनम्, लवनम्, निष्पावः, हलयति इत्यादयः अनेके शब्दाः वर्त्तन्ते। देवदत्तस्य धान्यं व्यतिलुनन्तीति व्यवहारस्तु कृषेः परमोन्नतिं प्रदर्शयति। क्रयविक्रयिक – (4/4/13) 'वस्नक्रयविक्रयाट्ठन्' वस्नेन जीवति



वस्निकः, क्रयविक्रयेण जीवति क्रयविक्रयिकः। क्रयविक्रयविषये महाभाष्यकार आह– **तैलं न विक्रेतव्यम्, घृतं न विक्रेतव्यम्** (महाभाष्यम्, एओङ्)। तैलघृतादीनां विक्रये तदानीं प्रतिबन्धः आसीत्, इदानीं तत्सर्वं विपरीतमिव सञ्जातम्। व्यापारिणां नामाभिधानं वस्तुनाम्ना तथा देशनाम्ना भवति, यथा–अश्ववाणिजः, गोवाणिजः, काश्मीरवाणिजः, मद्रवाणिजः, 'गन्तव्यपण्यं वाणिजे' (6/2/13) सूत्रोदाहरणेन ज्ञायते यत् तदानीं विस्तृतस्तरेऽपि व्यापारो भवति स्म।

**आपणविषयेऽपि–** 'गोचरसंचरवहव्रजव्यजापणनिगमाश्च' (3/3/119) अत्र 'बाजार' इति शब्दस्य कृते आपणशब्दः प्रयुक्तः, काशिकायां लिख्यते यत् – एत्य तस्मिन् आपणन्त इत्यापणः। 'तेन क्रीतम्' (5/1/36) सप्तत्या क्रीतं साप्ततिकम्, नैष्किकम्। अत्र सुवर्णादिमाध्यमेन मुद्राद्वारा क्रयणं भवति यथा– सहस्रेण क्रीतम् (5/1/26) शूर्पेण क्रीतं शौर्पम् (5/1/26) द्विकार्षापणम् (5/1/29) इत्यादयः।

**करशुल्कादिविषये** यथा – 'तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते' (5/1/46) पञ्च अस्मिन् शुल्को दीयते इति पञ्चकः सप्तकः। 'ठगायस्थानेभ्यः' (4/3/75) सूत्रे शौल्कशालिकः इत्युदाहरणं प्रदत्तम्।

ऋणादिविषयेऽपि एतादृशे सुपरिष्कृते समाजे ऋणादानादिव्यवहारो नासीदिति वक्तुमप्यशक्यम्। तत्र उत्तमर्णः, अधमर्णः, ऋणम्, वृद्धिः, प्रतिदानम्, प्रतिभू इत्यादयः शब्दाः वर्त्तन्ते। तत्र ऋणादानादाने न कश्चिद् विरोधः इति सूत्रकारः प्रमाणाम्– 'प्रयच्छति गर्ह्यम्'–(4/4/30) द्विगुणं प्रयच्छति द्वैगुणिकः। तत्र हि भाष्यकारः– ''अयुक्तोऽयं निर्देशः यदसावल्पं दत्त्वा बहु गृह्णाति तद् गर्ह्यम्, गर्ह्यार्थं गर्ह्यं, द्विगुणं मे स्यादिति प्रयच्छति– द्वैगुणिकः। कर्षकाणाम् ऋणविषये– धनित्वञ्च तदानीं धान्येनापि व्यवहरन्ति स्म 'तृतीया तत्कृतार्थेन गुणवचनेन' (2/1/29) इति सूत्रे धान्येन धनवान् इत्युदाहरणेन प्रदर्शितम्। न केवलं धनेनैव धनी भवति किन्तु धान्येन। तस्मिन् समये कर्षकाश्च ऋणेन व्याप्ता इत्येवमुदाहरणं न दृष्टिगोचरं सम्पूर्णे सूत्रोदाहरणे भाष्ये च, इदानींतनीयेन व्यवहारेण ये ये नगराद् बहिर्ग्रामे घोषे वा वर्त्तन्ते ते सर्वेऽपि ऋणिनोऽवश्यं भवेयुः, ये ग्रामे वसन्ति ते नानाविधानि वस्तूनि निष्पादयन्ति नागरिकान् द्रव्यव्ययेन विक्रीणन्ति च – इत्थमासीत्पुरातनो व्यवहारः।

भृत्यादिना कर्मकरा अपि तदानीमासन् तद्भृत्यवलोकनेन च वस्तूनां मूल्यमपि निर्धारयितुं शक्यम् – स्वरितञितः (1/3/62) सूत्रे भृतिलाभार्थं कर्मकराः कुर्वन्तीति ज्ञायते। तथा च 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (1/4/44) सूत्रे परिक्रयणं नियतकालं वेतनादिना स्वीकरणं नात्यन्तिकः क्रय एव। शतेन परिक्रीतोऽनुब्रूहि उदाहरणे 'भृतिः' इति वेतनविषये एका दृष्टिः प्रदत्ता। क्षेत्रादि, धान्यमूल्यानि, धान्यसञ्चयः इत्यादिविषये प्रभूतानि उदाहरणानि सूत्रे भाष्ये च दरीदृश्यन्ते।

ये आयुधजीविनः सन्ति (4/4/44) यथा– आयुधेन जीवति आयुधीयः, ये शस्त्रैः जीवनं यापयन्ति। अन्यच्च 'व्रातेन जीवति'– व्रातिनः–**नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनः सङ्घा व्राताः।** व्राताः, पूगाः विशेषजातयः सन्ति ते जीविकोपार्जनं कृत्वा जीवन्ति, तेषां विशेषसमुदायानां सूक्ष्मवर्णनं दृश्यते। (5/2/21)

प्रमाणोन्मानमुद्रादिद्वारा व्यापारः, क्रयविक्रयणं तदानीं सुप्रसिद्धः व्यापार आसीत्। जीवनयापनार्थं ये कार्यकलापाः आर्थिकदृष्ट्या आसन् तस्य व्यापकवर्णनं व्याकरणग्रन्थेषु दृश्यते।

महर्षिपाणिनिना सूत्रद्वारा सम्पूर्णविषयोपरि प्रकृतिप्रत्ययद्वारा शब्दसाधुत्वव्याजेन आर्थिकजीवने यदुक्तं तत् सम्पूर्णस्यास्य आर्थिकपक्षस्य सर्वं पक्षं समुद्घाटयति, येन शब्दज्ञानिनः भूत्वा वयं व्यवहारपक्षे अवतरामः। महर्षिपाणिनेः शब्दज्ञानं सर्वेषां कृते सर्वस्मिन् पक्षे सर्वकाले मार्गप्रदर्शकं वर्त्तते। अत एवोच्यते– **पाणिनिशब्दो लोके प्रकाशते।**

❖